वा॰ शा॰ ४८

# वास्तुशान्ति

। श्रीकाशीविश्वनाथपुरीमेमहल्लाछोटकीपीअरीपरयहबाबूकवलेश्वरसिंहकेमकानमेबाबू किसुनदयालसिंहकेछापाखनेमेगनेसप्रभाकरछापाखानेमे वास्तुशान्तिपद्धतिछापागयाजिस कोलेनाहोयसोनईसडकपरबाबूकवलेसरसिंहकेदुकानपरमिलैगा ॥ ली॰ द्वारकातिवारी॥ पंडितयुगलकिशोरजीनेशुद्धकियाहै सम्वत् १९४२॥

राम ४७

# ॥वास्तुशान्तिपद्धतिप्रारंभः॥

॥श्रीगणेशाय नमः॥ प्रायश्चित्तपूर्वदिने कृतप्राशोपोष्य स्वअपराह्णे कं वा पर्षत्त्वेनोपवेश्य पक्तनस्त्रानोऽशक्तश्चेदार्द्रवाससं प्रो-
ष्य वाससी परिधायाचम्य बद्धशिखः कृततिलकः कुशोपग्रहः पूर्वाभिमुखः कर्त्तोपविश्याचम्य प्राणायामं कृत्वा ॐ तत्सदद्ये-
त्यादि देशकालौ स्मृत्वा मम सकलपातकनिवृत्त्यर्थं विष्णुपूजनपूर्वकं देहशुद्ध्यर्थं च प्रायश्चित्तं करिष्ये। प्रायश्चित्तारम्भनिमित्तं
विष्णोः षोडशोपचारैः पंचोपचारैर्वा पूजनं करिष्ये॥ आवाहनादि प्रदक्षिणान्तां विष्णुपूजां विधाय ततः क्लिन्नवासाः पर्षदं
प्रदक्षिणीकृत्य हृदयेन दुह्यमानो धरण्यां साष्टांगं प्रणमेत्। ततो द्विजाः पृच्छन्ति किं ते कार्यमुपविश्यागतः स्थितः। किं ते कार्यं
वदास्माकं किं वागमयसे द्विज। तत्त्वतो ब्रूहि नः सर्वं सत्यं हि गतिरात्मनः। अस्माकं चैव सर्वेषां सत्यमेव [illegible]पदिचेद्वृक्षसे
नित्यं नियतं प्राप्स्यसे भवान्। यद्यागतोऽस्य सत्येन तत्त्वं शुद्धासि कर्हिचित्। एवं तैः समनुज्ञातः सर्वेत्तु सुपदेशतः। ब्राह्मणानामग्रे प्रा-
र्थना। समस्तसंपत्समवाप्तिहेतवः समुत्थितापत्कुलधूमकेतवः। अपारसंसारसमुद्रसेतवः पुनन्तु मां ब्राह्मणपादपांसवः १ अ-
पद्घनध्वान्तसहस्रभानवः समीहितार्थार्पणकामधेनवः। समस्ततीर्थांबुपवित्रमूर्त्तयो रक्षन्तु मां ब्राह्मणपादपांसवः २।
विप्रौघदर्शनात् क्षिप्रं क्षीयन्ते पापराशयः। वन्दनान्मंगलावाप्तिरर्चनादच्युतं पदम् ३ आधिव्याधिहरं नृणां मृत्युदारिद्र्यनाशन- रामः
म्॥ श्रीपुष्टिकीर्तिदं वन्दे विप्रश्रीपादपंकजम् ४ इति स्तुत्वा॥ विप्रैः किं ते कार्यमित्युक्ते मा वादीः सत्यमेव वदेति पृष्टः गोहषयो १

निःक्षयीभूतं रजनद्व्यंस—ष्योऽब्राह्मणोभ्यः संप्रददे तमभेति संकल्पपूर्वकं सभ्याग्रे निधाय। अमुकनाम्नो मम जन्मप्रभृति अ-
द्ययावत् ज्ञाताज्ञातकामाकामसकृदसकृत्कृतकालायिकवाचिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातका-
तिपातकोपपातकगुरुलघुसूक्ष्मपातकसंकरीकरणमलिनीकरणपात्रीकरणजातिभ्रंशकरप्रकीर्णकपातकानां मध्ये संभा-
वितानां पापानां निरासार्थं मनुग्रहं कृत्वा प्रायश्चित्तमुपदिशन्तु भवन्त। इति वदेत्। पुत्रादिः प्रतिनिधिश्चेन्मम पितुर्जन्मप्रभृतीत्यादि व-
देत्। तत्र पुनः प्रार्थना। सर्वे धर्मविवेक्तारो गोप्तारः सकला द्विजाः। मम देहस्य संशुद्धिं कुर्वन्तु द्विजसत्तमाः। मया कृतं महाघोरं ज्ञातम-
ज्ञातकिल्बिषं॥ प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छथ। पूज्यैः कृतपवित्रोऽहं भवेयं हि द्विजसत्तमैः॥ इति प्रार्थयित्वा। मामनुगृ-
ह्णन्तु भवन्त इति प्रणमेत्॥ ततः सभ्यैरुपदिष्टो यथाशक्ति उत्तममध्यमाधमादि पर्षच्छ्रविचार्या स्मिन्युक्तेऽयं समर्थ इति
निश्चिते कर्त्ता चन्दनपुष्पादिभिः पुस्तके सरस्वतीपूजामनुवादकपूजां च कृत्वा तन्निबंधपूजात्वेन किंचिद्द्रव्यं निधायानु-
वादकाय भूतिरूपां दक्षिणां पापानुसारेण दद्यात्। ततः सभ्याः पुस्तकवाचनपूर्वकमनुवादकस्याग्रे कथयेयुः। अनुवादक-
श्च कर्त्तारं प्रतिवदेत्। तद्यथा। सभ्यैरुपदिष्टोऽनुवादकः अमुकस्य ते जन्मप्रभृति अद्ययावत् ज्ञाताज्ञातस्य कृदसकृत्का-
यिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातकातिपातकोपपातकगुरुलघुसूक्ष्मपातकसंकरीक

वा॰प्र॰ २ रणमलिनीकरणपात्रीकरणजातिभ्रंशकरप्रकीर्णकपातकानां मध्ये संभावितानां पापानां निरासार्थं पर्षदुपदिष्टं सार्द्धाब्दादि-
प्रायश्चित्तं अमुकप्रत्याम्नायद्वारा प्राचीदीचीर्णसहितं त्वया आचरितव्यं तेन तव शुद्धिर्भविष्यति न्यूनतस्त्वं सर्वेभ्यः पातकेभ्यः कृता
र्थो भविष्यसि। इति त्रिरुपदिशेत्। कर्ता ओमित्यंगीकृत्य प्रणम्य पर्षदं विसृजेत्। शूद्रस्त्रियौ तु स्वीकरोमि। इत्युक्त्वा नमस्कृत्य
नाविसृजेत्। ततो द्वादशाब्दम्। आम्नायपक्षे अयुतं गायत्रीं जपेत्। गायत्र्यास्तिलहोमसहस्राणि वा द्वादश ब्राह्मणभोजनं वा एतत्सर्व
मादिकम्। तेन कर्ता चिकीर्षितकर्मणां निर्णीतदिने कृतमाध्याह्निकः सायाह्ने गंगादितीर्थे गृहे वा देशकालौ निर्दिश्य मद्दः शर्म्मणो मम
जन्मप्रभृत्यद्ययावत् ज्ञानाज्ञानकामाकामसकृदसकृत्कायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतस
कलपातकातिपातकोपपातकगुरुलघुस्थूलसूक्ष्मपातकसंकलीकरणमलिनीकरणपात्रीकरणजातिभ्रंशकरप्रकीर्णकपा
तकानां मध्ये संभावितानां पापानां निरासार्थममुककर्म्माधिकारार्थं च श्रीपरमेश्वरप्रीत्यर्थं सभ्योपदिष्टमद्दःप्रायश्चित्तं प्राचीदी
चीर्णसहितममुकप्रत्याम्नायेनाहमाचरिष्यामि। तथा वपनदन्तधावनपंचगव्यादिदशविधस्नानानि च करिष्ये ऽ इति संकल्प्य
पुनः प्रार्थयेच्च। शृणुध्वं त्वमिदं विप्रास्तु त्वमादिश्य नेवृतम्। तत्रैयत्नेन कर्तव्यमन्यथा न हि याभवेत्। ततः शिरसि हस्तं निधाय। आत्मनः रामः २
शुद्धिकामो वा पितृणां तृप्तिहेतवे। वपनं कारयिष्यामि तीरेऽहं तव जाह्नवि। यानि कानि च पापानि ब्रह्महत्यासमानि च। केशानाश्रित्य तिष्ठं

तस्मात्केशान्वपाम्यहम्। महापापोपपापाभ्यां केशलोमनखादिना। क्षुरादिच्छिन्नसर्वाङ्गास्ते मे दोषाः पतन्त्वधः ३। इति मंत्रं पठि
त्वा शिखाकक्षोपस्थवर्जं नखलोमकेशानां देवक्रमेणोदक्संस्थं वपनं श्मश्रूपपक्षकेशांश्च —— वापयित्वा॥ अथवा मातृषट्क
मेणोपपक्षश्मश्रुकेशान्वापयेत्। तत्रापि दक्षिणश्मश्रुपक्षौ वापयित्वा वामौ वाप्यौ। शिरसि शिखामादिं कृत्वा ऽधस्तात्सर्वतो वा
पयेन्नोदक्संस्थं यतिशूद्रविधवादीनां सशिखवपनं यत्र गोब्रह्महत्यादिपापेष्वपि सशिखं सर्वांगलोम्नां च तत्र प्रायश्चित्ते शिखा
सहितमपि विशेषवचनात्। सधवानां द्व्यंगुलं त्र्यंगुलं वा क्षुरेण केशाग्रच्छेदनं। यत्र तु सभर्तृकस्त्रिया जीवत्पितृकादेः राजादीना
मिच्छया वपनाभावः। तत्र सार्द्धद्वादि द्विगुणव्रतं पर्षद्दक्षिणा च द्विगुणा॥ तदुक्तं हेमाद्रिप्रायश्चित्तखंडे॥ प्रेतकृत्ये राज
दंडे वपनं केशपूर्वकम्॥ अग्निहोत्रे च तीर्थे च वपनं श्मश्रुपूर्वकं। ब्रह्महत्यादिपापेषु सशिखं वपनं स्मृतम्। वपनाभावे द्वि
गुणव्रतदक्षिणापोष्यतत्र प्रमाणमाम्नेयः॥ राजा वा राजपुत्रो वा ब्राह्मणो वा विशेषतः॥ केशानां रक्षणार्थाय द्विगुणं व्रत
माचरेत्। यस्तु न द्विगुणं दानं केशान्वाञ्छति रक्षितुम्। केशानां रक्षणार्थाय छेदयेदंगुलद्वयम्। प्रमादाच्छिखावपने कुशम
यशिखां ब्रह्मग्रंथियुतां दक्षिणकर्णे निदध्यादिति काठके। शिखां छिन्दन्ति ये मोहाद्द्वेषादज्ञानतोपि वा। पुनः संस्कारमर्हन्ति त्र
यो वर्णा —— द्विजातयः॥ इति गृह्याग्निसागरे। अत्र वपनादूर्ध्वं शीतोदकेन स्नानं कार्यमित्युक्तं रुद्रकल्पद्रुमे। सोऽयं गंडूषान्कृत्वा यथाद

वा॰प्र॰ ३ काष्ठं मंत्रेण गृहीत्वा मंत्रो यथा ॥ आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च । ब्रह्म प्रज्ञां च मेधां च त्वन्नो देहि वनस्पते । इति मंत्रेणा॰
भिमंत्रितेन द्विजानान्द्वादशांगुलप्रमाणेन स्त्रीशूद्रादीनां मुष्टिप्रमाणेन अपामार्गादिदन्तकाष्ठेन प्राङ्मुखः सन् अन्नाद्याय इति मंत्रेण । पु॰ मं॰
मुखदौर्गंध्यनाशाय दन्तानां च विशुद्धये । ष्ठीवनाय च गात्राणां कुर्वेहं दन्तधावनम् । इति मंत्रेण दन्तान्धावयित्वा । काष्ठान्तरेण
जिह्वामुल्लिख्य जलाशयं गत्वा शुचिमज्ज्य भस्मादिदशविधस्नानानि कुर्वीत तानि यथा । प्रायश्चित्ताङ्गं भस्मस्नानं करिष्ये । ईशानः स
र्वविद्यानामित्यादिमंत्रैः अथवा ईशानाय नमः शिरसि लिंपेत् । एवं तत्पुरुषाय नमः इति मुखे अघोराय नमः इति हृदि । वामदेवाय
नमः गुह्ये । सद्योजाताय नमः पादयोः । प्रणवेन सर्वाङ्गेषु पुराणमंत्रो यथा । यथाग्निर्दहते भस्म तृणकाष्ठादिसंचयं । तथा मे दह्यतां
पापं कुरु भस्म शुचे शुचि आचम्य । इति भस्मस्नानम् । ततः प्रायश्चित्तांगत्वेन गोमयस्नानं करिष्ये । मानस्तोक इति गंधद्वारामिति वा । पु॰
मं॰ । अग्रमग्रं चरन्तीनामोषधीनां रसं वने । तासामृषभपत्नीनां पवित्रं कायशोधनं । अग्रमग्रं चरन्तीनामोषधीनां रसं वने । यन्मे रो॰
गं च शोकं च तन्मे दह नुगोमय । इत्यनेन चामंत्र्य सूर्याय प्रदर्श्य दक्षिणहस्तेन शिरसि तूष्णीं सकृदनुलिप्य द्विर्नाभेरुपरि त
न्वंगेषु अनुलिप्य वामकरेण नाभेरधस्तात् पादं त्रिरनुलिंपेत् । ततः प्रायश्चित्तांगत्वेन मृत्तिकास्नानं करिष्ये । ततो भूमिं प्रार्थ्य राम
मा वोरिखनत्खनित्रेति खनित्वा । स्योना पृथिवीति मृदमादाय । नमो मित्रस्येति सूर्याय प्रदर्श्य । गंधद्वारामित्यनेनाभिमन्त्र्येदं वि ३

ष्णुरिति गोमयवदनुलिप्य । पु॰ मं॰ अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुंधरे । मृत्तिके हर मे पापं यन्मया पूर्वसंचितम् इति मृदमभिमंत्र्य ।
उद्धृतासि वराहेण कृष्णेन शतबाहुना । शिरसा धारयिष्यामि रक्षस्व मां पदे पदे ॥ इत्यनुलिप्य । ततः प्रायश्चित्ताङ्गं शुद्धोदकस्ना
नं करिष्ये । आपो अस्मानिति । आपो हि ष्ठेति वा । विष्णुपादाग्रसंभूते गंगे त्रिपथगामिनी धर्मद्रवेति विख्याता पापं मे हर जान्ह
वी । सरस्वत्यादि नद्यंबु पावनं पापनाशनं । शरीरस्य विशुद्ध्यर्थं स्नास्यामि व्रतसिद्धये । ततः प्रायश्चित्ताङ्गत्वेन गोमूत्रस्नानं
करिष्ये । इति संकल्प्य गायत्र्या गोमूत्रेण स्नायात् पु॰ मं॰ । गोशरीरसमुद्भूतं पवित्रं क्लेशनाशनम् । स्नानार्थं प्रति ॥ गृह्णामि गो
मूत्रं मलनाशकम् । ततः प्रायश्चित्ताङ्गत्वेन गोमयस्नानं करिष्ये । इति संकल्प्य मानस्तोके गंधद्वारामिति वा । प्रातर्गोभिरु
त्सृष्टं गोमयस्यान्तरिक्षस्थस्य ग्रहणं । भूमिष्ठं चेदुपर्यधश्च संत्यज्य मध्यस्थस्य ग्रहणम् गोमयेन स्नायात् । पु॰ मं॰ । गोमये
वसते लक्ष्मीः पवित्रं सर्वमंगलम् ॥ ॥ स्नानार्थं संस्कृतं शुद्धं पापं मे हर गोमय ॥ ततः प्रायश्चित्ताङ्गत्वेन पयस्नानं च करिष्ये ॥ आ
प्यायस्वेति पयसा स्नायात् । पु॰ मं॰ । पयो मिश्र पुष्टिदं च सौरभेयं सुनिर्मलम् । शरीरस्य विशुद्ध्यर्थं मम दोषस्य प्रणाशकम् ॥
ततः प्रायश्चित्ताङ्गत्वेन दधिस्नानं करिष्ये । दधिक्राव्ण इति दध्ना स्नायात् । पु॰ मं॰ । दुग्धसारं तु माङ्गल्यं चन्द्रकान्तिसमप्र
भम् । दधि सर्वगुणोपेतं स्नानार्थं गृह्यतां मया । ततः प्रायश्चित्ताङ्गत्वेन घृतस्नानं करिष्ये ॥ घृतं घृतपावानस्तेजोसीति वा घृते

बा॰प्र॰ नस्नायात्। पयसा मन्थितं हृदये ग्लस्तं तेजो विवर्द्धकम्। सर्वकल्मषनाशाय स्नास्यामि हितकाम्यया। ततः प्रायश्चित्ताङ्गत्वेनुकुशोर
४ कस्नानं करिष्ये। इति संकल्प्य देवस्य त्वेति मंत्रत्रयेणापो हि ष्ठेति तिसृभिर्ऋग्भिः पुनन्तु मेति नवभिः पावमानीभिश्च कुशैर्मार्जयेत्। य
दैतानि दशविधस्नानांगमंत्रकाण्येव कार्याणि। पु॰ मं॰ विष्णुदेहसमुत्पन्नाः ब्रह्मणा स्वकरे धृताः॥ तत्संलग्नकुशाग्रैस्तैर्जलैः स्नास्या
मि शुद्धये॥ मच्छरीरं पावयन्ति निर्मला निर्जलानि वै। आपश्च शुद्धाः स्वरूपा रुद्ररूपाः समीरिताः। मां पुनन्तु च पापेभ्यो यत्कृष्टं
भ्यो द्विजोत्तम॥ अभिषिञ्चामि शुद्ध्यर्थं शरीरं दुःखभाजनम्॥ ततः ॐ नमो नारायणायेति जलमध्ये चतुरस्रं तीर्थं प्रकल्प्य॥
शिखां विमुच्य केशान्द्विधाकृत्वाङ्गुलीभिः श्रोत्रद्वन्द्वं नासिकामुखं पिधायेदं विष्णुरिति मंत्रेण ततो नारायणायेति वा विष्णुं
संपूज्य नद्यां प्रवाहाभिमुखोऽन्यत्र सूर्याभिमुखो निमज्जेत्। एवं त्रिः षड्वा द्वादशकृत्वः शक्त्या वा निमज्ज्य पुनर्जले निमग्नः सन्नृतं
चेति सूक्तस्य त्रिः सकृद्वा जपेनाघमर्षणं विदध्यात्॥ स्त्रीशूद्रा घमर्षणे तु नमो भगवते वासुदेवायेति मंत्रं वारत्रयं पठ
न्परमात्मानं भगवन्तं विचिन्तयन्नघमर्षणं कुर्यात्। इति सांप्रदायिकाः। ततः स्नानाङ्गतर्पणं। ॐ भूर्देवांस्तर्पयामि। ॐ भुव
र्देवांस्तर्पयामि। ॐ स्वर्देवांस्तर्पयामि ॐ भूर्भुवः स्वर्देवांस्तर्पयामि। ततः कंठं कृत्वा। ॐ भूरृषींस्तर्पयामि। ॐ भुवरृषींस्तर्प राम॰
यामि। ॐ स्वरृषींस्तर्पयामि॥ ॐ भूर्भुवः स्वरृषींस्तर्पयामि। अपसव्यं। ॐ भूः पितॄंस्त॰ ॐ भुव पितॄंस्तर्पया॰। ॐ स्वः॥ ४

पितॄंस्त॰ ॐ भूर्भुवः स्वः पितॄंस्त॰। ततः सव्येन ब्रह्मादयो देवास्तृप्यन्तु। कंठी॰ कृष्णद्वैपायनादय ऋषयस्तृप्यन्तु। अपसव्यं। कव्य
वाडादयो दिव्यपितरस्तृप्यन्तु एतावत्तर्पणं जीवत्पितृकाणाम्। मृतपितृकाणां तु अमुकगोत्रा अस्मत्पित्रादयस्तृप्यन्तु। इति वि
शेषः। ततः यन्मया दूषितं तोयं शारीरमलसम्भवं। तस्य पापस्य शुध्यर्थं यक्ष्माणं तर्पयाम्यहम्॥ अत्र केचिन्नित्यविधिवत्स्ना
नमिच्छन्ति। केचिद्वै मार्दिप्रयोगः पठन्ति च। ततो जलादुत्क्रम्यापोऽअस्मानिति जपेत्। तत्र वरुणाय नमः इति जपेत्॥ ततो य
ज्ञोपवीत्याचम्य यथोक्तधौतेवाससी परिधाय मृदोद्धृतकरौ प्रक्षाल्याचम्य विधिवद्वर्णक्रमेणोर्ध्वपुंड्रं त्रिपुंड्रार्धचन्द्रं वा ति
लकं विदध्यात्। यत्रैतत्स्नानं गृहे भवति तत्रैतावन्मेव वर्ज्यम्। तत्राह यमः। नित्यं नैमित्तिकं चैव क्रियामंगलकर्मणाम्। तीर्थाभा
वे तु कर्तव्यमुष्णोदकपरोदकैः। परोदकैः शीतोदकैरित्यर्थः। तथा गृहस्नानेन कुर्वीत मार्जनं चाघमर्षणम्॥ नान्तरा तर्पणं कु
र्यात्। स्नात्वाचम्य शुध्यति गृहे स्नानं यदा कुर्याद्वस्त्रं मूर्ध्नि परित्यजेत्। अधश्चाग्रेण संपीड्य पाराशर्यवचो। यथापति मती स्त्री वि
षये व्यासः। कुलस्त्री सशिरः स्नायादृतुसंवसतितैलतः। वीरो वापैतृके कर्मण्यप्यन्यदा कण्ठसंप्लवेति॥ ततस्तीर्थान्यात्रं जलैः प्रपूर्य
गृह माममन्यधिके युग्मे द्विजैरावाहनाग्नौकरणविकिरावनेजनपिंडदानात्यापोदकस्वधावाचनरहितं पार्वणविधिश्राद्धं कु
र्यात्। ततः सर्वे ह्यपि द्विजेषु विष्णोरेव पूजनं शिष्टा एवं कुर्वन्ति। ततआचम्य देशकालौ संकीर्त्य अंगीकृतप्रायश्चित्तांगत्वेन वि

ष्णुश्राद्धं करिष्ये। इति संकल्प्य शालिग्रामशिलायां श्वेतचन्दनादिभिर्विष्णुं संपूज्य करेण यथाशक्ति द्रव्यमादाय माल्य चतुष्टयनि
ष्क्रयभूतं दद्यात्। देशादि स्मृत्वा विष्णुप्रीत्यर्थं प्रायश्चित्ताङ्गं विष्णुश्राद्धं संपन्नं यच्छ्रीविष्णूद्देशेन त्र्यधिकयुग्मब्राह्मणभोजनप
र्याप्तामनिष्क्रयीभूतं द्रव्यं रजतं चन्द्रदैवतं चतुर्भ्यो ब्राह्मणेभ्यः संपूजितेभ्यो यथाभागं विभज्य दातुमहमुत्सृज्ये। तेन पापाप
हा श्रीभगवान्विष्णुः प्रीयतां न मम। ततः पूर्वाङ्गं गोदानं। तद्यथा उदङ्मुखब्राह्मणमुपवेश्य आचम्य प्राणानायम्य देशकालौ स्मृत्वा
गोकृतप्रायश्चित्ताङ्गत्वेन विहितं पूर्वाङ्गं गोदानमहं करिष्ये। संकल्प्य गोप्रतिग्रहीत्रे ब्राह्मणाय तेन तेपाद्यादिभिरभ्यर्च्य कुंडलमु
द्रिकावर्णसंभारान्गृहीत्वा अमुकगोत्रामुकप्रवरामुकशाखाध्यायिनममुकशर्म्माणं गोदानप्रतिगृहीतारं त्वामहं वृणे। वृतोस्मीति
प्रतिवचनम्। ततः स्वपुरतः प्राङ्मुख्यायाः सवत्साया गोरवस्थापनं। ॐ सवत्सायै गवे नम इति तस्यां गंधमाल्यवस्त्रादिभिः पू
जनं। ब्राह्मणहस्ते सुप्रोक्षितादि कृत्वा वामहस्ते ससुवर्णमाज्यपात्रं गृहीत्वा तत्र गोपुच्छं प्रक्षिप्य दक्षिणहस्ते सयवकुशं
जलमादाय देशकालौ संकीर्त्याज्यदिग्धं गोपुच्छं गृहीत्वा ॐ गवामंगेषु तिष्ठन्ति भुवनानि चतुर्दश। यस्मात्तस्माच्छिवं मेस्यादिहलो
के परत्र च। गावो मे ह्यग्रतः सन्तु गावो मे सन्तु पृष्ठतः। गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम्। यत्तत्साधनभूता या विश्वस्याघौघना। 
शिनी। विश्वरूपधरो देवः प्रीयतामनया गवेत्युक्त्वा॥ अमुकगोत्रायामुकप्रवरायामुकशाखाध्यायिनेमुकशर्मणे ब्राह्मणाय।

मुकगोत्रोहममुकशर्म्मा प्रारीप्सितप्रायश्चित्तसाद्गुण्यकाम इमां सवत्सां गां रुद्रदैवत्यां यथाशक्त्यलंकृतां तुभ्यं संप्रददे। इत्युक्त्वा
तिलयवकुशकुसुमजलाज्यपात्रान्वितगोपुच्छं ब्राह्मणस्य हस्ते दानम्। ॐ देवस्य त्वेति मंत्रं पठित्वा ब्राह्मणोपि रुद्राय त्वेति तां प्रतिगृह्य
कोदादित्यनुमंत्रयते अथवा प्रणवेन प्रतिगृह्य कोदादित्यनुमंत्रयेत्। तत्र प्रतिगृह्णामीत्येव वदेत्। ततः सुवर्णं परिमितं यथाश
क्ति वा हिरण्यमादाय कृतस्य गोदानप्रतिष्ठासंसिध्यर्थं इमां दक्षिणां तुभ्यमहं संप्रददे न ममेति दक्षिणां दद्यात्। ब्राह्मणोप्यग्नये
त्वेति गृह्य कोदादिति चो स्वस्तीति वानुमंत्रयेत्। कृतस्य गोदानविधेः परिपूर्णमस्त्विति वदेत्। ब्राह्मणाशिषां ग्रहणं। इति पूर्वाङ्ग
गोदानम्। एवंविधगोदानाशक्तौ यथाशक्ति तन्मूल्यं दद्यात्। तत्र प्रयोगः प्रायश्चित्तपूर्वाङ्गत्वेन विहितगोदानप्रत्याम्नायत्वेन
यथाशक्ति गोनिष्क्रयद्रव्यं तुभ्यमहं संप्रददे न ममेति। नात्र मूल्ये दक्षिणादानम्॥ अथ व्याहृतिहोमः। कर्ता स्थंडिलसमीपउप
विश्याचम्य प्राणानायम्य देशकालौ संकीर्त्य प्रारीप्सितप्रायश्चित्तसपूर्वांगत्वेन विहितं महाव्याहृतिभिराज्येनाष्टोत्तरशतम
ष्टाविंशतिर्वा होमं करिष्ये। स्वयं कर्तुमसमर्थश्चेत्तदा महाव्याहृतिहोमार्थममुकगोत्रममुकशर्म्माणं होतृत्वेन त्वां वृणे। वृतो
स्मीत्युक्ते दे॰गोत्रोद॰ शर्मा दे॰गोत्राद॰ शर्म्मणा यजमानेन वृतोहं व्याहृतिहोमं करिष्ये। तदंगत्वेन स्थंडिलोल्लेखनाद्यग्नि
प्रतिष्ठापनादि करिष्ये। इति संकल्प्य स्थंडिले पंचभूसंस्कारान्कृत्वा विरनामाग्निं प्रणयामि। इत्यग्निं प्रतिष्ठाप्य ध्यात्वा संपूज्य परिसमु

वा॰प्र॰ द्यपवित्रे संपाद्य ताभ्यां पर्युक्ष्याज्यमधिश्रित्य स्रुवं संस्कृत्याज्यमुत्तार्य पवित्राभ्यामुत्पूय समिधं हुत्वा स्रुवेणाज्यं जुहुयात्
६ ।अथ ऋष्यादिस्मरणम्। इरावतीति वसिष्ठस्त्रिष्टुप् पृथिवी इदं विष्णुर्मेधातिथिर्गायत्री विष्णुर्मानस्तोक इति कुत्सो जगती रुद्रो
ब्रह्मप्रजानं प्रजापतिस्त्रिष्टुब्ब्रह्मा तत्सवितुर्विश्वामित्रो गायत्री सविता ओंकारस्य ब्रह्मा गायत्री परमात्मा तिसृणां महाव्याहृतीनां प्रजा
पतिर्देवी गायत्री देव्युष्णिग्देवी गायत्र्यग्निवायुसूर्या देवताः सर्वेषां प्रायश्चित्तांग पंचगव्यहोमे विनियोगः। ओं भूर्भुवः स्वरिति
महाव्याहृतीनां प्रजापतिऋषिर्गायत्र्युष्णिगनुष्टुप्छंदांसि अग्नि— वायुसूर्या देवता त्वन्नः सत्वन्नो याश्चाग्नेये ते शतमिति मंत्राणां
वामदेव ऋषिस्त्रिष्टुबग्निवरुणौ देवते द्वयोः तृतीयस्याग्निश्चतुर्थस्य वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्का उदुत्तममिति शुनः
शेपस्त्रिष्टुब्वरुणो देवता सर्वेषामाज्यहोमे विनियोगः अथ देवताभिध्यानम्॥ तत्र प्रायश्चित्तपूर्वांगहोमे देवताभिध्यानपरिग्र
हार्थमन्वाधानं करिष्ये॥ समिद्द्वयं गृहीत्वा। तत्र प्रजापतिमिंद्रमग्निं सोममाज्येन अग्निं वायुं सूर्यं प्रजापतिं अष्टोत्तरशतमष्टाविं
शतिमाज्येन पुनरंत प्रधाने। पृथिवीं विष्णुं रुद्रं ब्रह्माणं अग्निं सोमं सूर्यं परमात्मानं प्रजापतिं अग्निं स्विष्टकृतं पंचगव्येनै
कैकयाहुतिभिः अग्निं वायुं सूर्यं अग्नीवरुणौ अग्नीवरुणौ अग्निं वरुणं सवितारं विष्णुं विश्वान्देवान्मरुतः स्वर्कान्वरुणं प्र राम॰
जापतिमेता देवता आज्येन अस्मिन्प्रायश्चित्तकर्मण्यवहंयस्ये समित्प्रक्षेपः ततो ब्रह्मोपवेशनादि पात्रासादनांते उपकल्प ६

नेविशेषः। आज्यसंस्कारकाले पंचगव्यं कृत्वा आज्येन सह पर्यग्निकुर्यात्। सुवर्णादिपात्रे पद्मपलाशादिपत्रे वा यज्ञियकाष्ठैर्ह
रितानि सप्रकुशपत्राणि। पंचगव्यं च गोमूत्रादि पृथक्पृथगिति। ततश्चाज्यभागान्ते अष्टोत्तरशतमष्टाविंशतिर्वाज्याहुतीनां
व्यस्तसमस्ताभिर्व्याहृतिभिर्होमः। ॐ भूः स्वाहा॥ इदमग्नयेनमम। ॐ भुवः स्वाहा॥ इदं वायवे। ॐ स्वः स्वाहा। इदं सूर्याय ओं भूर्भुवः
स्वः स्वाहा। इदं प्रजापतये। केचिदंते सर्वत्र इदं महाविष्णवे पापघ्ने न ममेति त्यागं वदन्ति। एवं सप्तवारं हुते अष्टाविंशतिराहुतयः
सप्तविंशतिवारं हुते अष्टोत्तरशतमाहुतयो भवन्ति। ततो ब्रह्मकूर्चेन होमः। सुवर्णादिपात्रे पद्मपलाशादिपात्रे वा ताम्रायः कृ
ष्णाया वा गोः पलमितस्य माषमितस्य वा गोमूत्रस्य गायत्र्या ग्रहणम्। ॐ गंधद्वारामिति मंत्रेण श्वेताया गोरंगुष्ठार्द्धमितस्य षो
डशमाषमितस्य वा गोमयस्य ग्रहणं। ॐ आप्यायस्वेति मंत्रेण श्वेताया हेमवर्णाया गोः सप्तपलमितस्य द्वादशमाषमितस्य वा गो
मयाष्टगुणस्य गोमूत्रत्रिगुणस्य वा क्षीरस्यादानम्। ॐ दधिक्राव्ण इति मंत्रेण रक्तायाः कृष्णवर्णाया वा गोस्त्रिपलस्य दशमा
षपरिमितस्य गोमयात्पंचगुणस्य गोमूत्रद्विगुणस्य वा दध्नो ग्रहणं॥ ॐ तेजोसीति मंत्रेण कपिलाया नीलाया वा गोरेकपल।
स्याष्टमाषमितस्य वा गोमयाच्चतुर्गुणस्याज्यस्य ग्रहणं। देवस्य त्वेत्यादिकेन पूष्णो हस्ताभ्यां गृह्णामीत्यन्तेन मंत्रेण पलमि
तस्य वा नदर्द्ध कुशोदकग्रहणम्। गोमूत्रादिकं पिलाया ग्राह्यम्॥ अलाभे गव्यमात्रं। ततः प्रणवेनालोडनं हस्तेन। प्रणवेनैव

वा॰प्र॰ पक्षिपकाष्ठेन निर्मथ्य प्रणवेनाभिमंत्र्य सप्तावरै रच्छिन्नाग्रैः शुष्कपर्णैः कुशैर्द्वादशाहुतिभिर्होमः। तत्र मंत्राः। इरावती॰ मयूखैः स्वाहा
७ । इदं पृथिव्यै न मम। इदं विष्णुः सुरे स्वाहा। इदं विश्वस्मै वे न मम। ॐ मानस्तोके॰ मह्ये स्वाहा। इदं रुद्राय न मम। उदकोपस्पर्शः। ॐ श
न्नो नुनः स्वाहा। इदमग्न्यै न मम। ब्रह्मयत्नानमिति। इदं ब्रह्मणे न ममेति केचिन्मन्यंते। अत्र ब्रह्मकूर्चे होममूलवचस्त्वेवमाह
तिचतुष्टयम्। तत्र स्मृत्यर्थसारे। एताभिश्चैव होतव्यं हुतशेषं पिबेद्द्विजः। एतेन च तत्तत्स्वाहुतयः संपद्यन्ते। परन्तु प्रथमास्विति
यास्वाहा। इदं सवित्रे न १ ॐ स्वाहा। इदं परमेष्ठिने न ४ ॐ भूर्भुवः स्वाहा इदं प्रजापतये न ५ ॐ अग्नये स्विष्टकृते स्वाहा। इदम
ग्नये स्विष्टकृते न ६ एवं दशाहुतयः। ततो भूराद्यानवाहुतयः संस्रवप्राशनादि प्रणीताविमोकान्तं कृत्वा। प्रायश्चित्तांगहो
मस्य साद्गुण्यता सिद्ध्यर्थं ब्राह्मणे पूर्णपात्रं वरो वा दक्षिणां तुभ्यमहं संप्रददे। ततः तारकोदयेन्नतग्रहणं करिष्ये। इति संकल्प्य
हिजान्पृष्ट्वा। कुरुष्वेति तैरनुज्ञातः प्रणवेन होमशेषमशेषं पंचगव्यं पिबेत्। तत्र मंत्रः। यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके। प्राश
नात्पंचगव्यस्य दहत्वग्निरिवेन्धनम्। एतच्च प्राशनं गामाहृहिः कार्यमिति भट्टाः कुतः। व्रतं निशामुखे ग्राह्यं बहिस्तारकदर्शनात्। राम॰
मिति स्मृतिसंगतम्। स्त्रीशूद्रयोर्होमपंचगव्यप्राशने विकल्पेन भवतः होमकरणपक्षे तौ विप्रद्वारा कारयित्वा तूष्णीं पिबत ७
। होमाकरणपक्षे प्राशनपक्षे तु तूष्णीं संपाद्य प्राशनं कार्यं॥ अस्मिन्नहनि शक्तस्तदोपवासं चरेत् ॥ अशक्तः॥ ६ ॥

श्रेद्विष्यान्नमश्नीयात्। ततउत्तरांगानि कुर्यात्। तद्यथा। देशकालौ संकीर्त्य ततः संकल्पितसाक्षाद्यथासंभवं प्रत्याम्नायद्वा
रा वा कुर्यात् गोनिष्क्रयद्रव्यदानपक्षे संकल्पः देशादि स्मृत्वा मममामुकशर्म्मणो जन्मप्रभृत्याद्युक्ताघोनिष्क्रयद्रव्यदानप्रत्या
म्नायद्वारां गोकृतषड्ब्द प्रायश्चित्तस्य संसिध्यर्थं इदमशीत्यधिकशतगोनिष्क्रयभूतं द्रव्यं यथानामगोत्रेभ्यो ब्राह्मणेभ्यो दात
महमुत्सृज्ये। इति व्रद्धादौ यथार्थमूहः इति प्रधानसंकल्पं कृत्वा तद्देवद्रव्यं विभज्य तेभ्यो निकुर्यात्। एवं प्रायश्चित्तं चरित्वापू
र्ववद्व्याहृतिहोमविष्णुश्राद्धं गोदानानि कृत्वा यथाशक्ति ब्राह्मणभोजनसंकल्पं भवति नात्र पंचगव्यहोमः उत्तरांगसंकल्पो यथा
आचीर्णस्यानुकम्पा प्रायश्चित्तस्य सांगतार्थमुत्तरांगानि करिष्ये। हवनसंकल्पादिकं पूर्ववद्बोध्यम्। शक्तो सम्यान्यंते दशदानानि कुर्या
त्। गोभूतिलहिरण्याज्यंवासो धान्यगुडानि च। रौप्यं लवणमित्याहुर्दशदानानि पंडिताः। एतत्साक्षादसंभवे तत्तन्मूल्यं दद्यात्। एत
न्मौल्यासंभवे पियथाशक्ति हिरण्यं दद्यात्। गृह्याग्निसागरे तस्मिन्नेव दिने उत्तरांगहोमश्चतस्मिन्नेवाग्नौ कार्यः इत्येतावन्मात्रयु
क्तं तत्तत्तत्प्रयोगः। पृथक्पृथक्ता योगो वेति विचारणीयमिति। तानि दशदानानि विस्तरेण लिख्यन्ते। देशादि स्मृत्वा गोदानलभ्यफलावा
प्त्यर्थं दशदानाङ्गभूतं गोदानं करिष्ये। इति संकल्प्य मनिगृहीनां ब्राह्मणं सवत्सां गां च संपूज्य पूर्ववद्द्वादशं कुर्यात्। एवं सर्वत्र यथा
र्थं संकल्पं कृत्वा तत्तद्वाक्येन संकल्पयेत्। निष्क्रयस्तु। द्वात्रिंशशत्पणिका गावः इति कात्यायनेन यत्किञ्चोल्प परिशिष्टे ह्युक्तं तत्ता

वा·प्र· प्रमानेन वराटकमानेनाथवा रौप्यरजतसुवर्णमानेन दानद्रव्यम्। अथ भूमिदानम्। सर्वसस्याश्रया भूमिर्वराहेण समुद्धृता। अनन्त
८ सस्यफलदा अतः शान्तिं प्रयच्छ मे। अद्येगोत्रादः शर्माणमिति गोदानप्रतिग्रहीतारं त्वामहं वृणे इति वृत्वा पूजयित्वा च दमां नि
वर्तनमितां भूमिं विष्णुदैवतां तुभ्यमहं संप्रददे देवस्य त्वेति द्यौस्त्वेति वा मंत्रं पठित्वा विसृजेद्भूमिम्। ओं प्रतिगृह्णामीत्युक्त्वा भूमेः प्र
दक्षिणां कृत्वा प्रतिग्रहणम्। तत्र। दशहस्तेन दंडेन त्रिंशद्दंडैर्निवर्तनम्। इति निवर्तनस्वरूपम्। अथ तिलदानं। तत्र विप्रवरणादि दे
शकालोच्चारणान्तं तेषु वक्ष्यमाणेषु ज्ञेयम्। महर्षेर्गोत्रसंभूताः काश्यपस्य तिलाः स्मृताः। तस्मादेषां प्रदानेन मम पापं व्यपोहतु। इ
त्युक्त्वा अमुकसगोत्रायेत्यादि अमुककाम इत्यंतं पूर्ववदुच्चार्य द्रोणपरिमितानिमांस्तिलान् प्रजापतिदैवत्यांस्तुभ्यमहं संप्रददे। हि
रण्यं दक्षिणा च। अथ सुवर्णदानं। हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनंतपुण्यफलदमतः शान्तिं प्रयच्छ मे। अद्येगोत्रा
येत्यादि पूर्ववदुच्चार्य इदं निष्कपरिमितमग्निदैवतं सुवर्णं तुभ्यमहं संप्रददे। रजतदक्षिणा च। अथाज्यदानं। कामधेनोस्समु
द्भूतं सर्वक्रतुषु संस्थितं। देवानामाज्यमाहारमतः शान्तिं प्रयच्छ मे॥ अमुकगोत्रायेत्याद्युच्चार्य इदं प्रस्थपरिमितमाज्यं सोमदै
वत्यं तुभ्यमहं संप्रददे। हिरण्यं दक्षिणा च॥ अथ वस्त्रं। शीतवातोष्णसंत्राणं लज्जायाः रक्षणं परं। देहालंकरणं चैव मतः शान्तिं राम·
प्रयच्छ मे। अथ धान्यं। सर्वदेवमयं धान्यं सर्वोत्पत्तिहरं महत्। प्राणिनां जीवनं यस्मादतः शान्तिं प्रयच्छ मे॥ अद्येगोत्राये। ८

त्यादि इमं सार्द्धखारिपरिमितं धान्यं विश्वेदेवदैवतं तुभ्यमहं संप्रददे। हिरण्यं दक्षिणा च। अथ गुडदानाय यथा देवेषु विश्वात्मा
प्रवरश्च जनार्दनः। प्रणवः सर्वमंत्राणां नारीणां पार्वती यथा। तथा रसानां प्रवरः सदैवेक्षुरसो मतः। मम तस्मात् परां लक्ष्मीं द
दस्व गुड सर्वदा। अद्येगोत्रायेत्याद्युच्चार्य पलषष्टिपरिमितं गुडं तुभ्यमहं संप्रददे। हिरण्यं दक्षिणा च। अथ रजतदानं। प्रीति
र्यत्र पितॄणां च विष्णुशंकरयोः सदा। शिवनेत्रोद्भवं रौप्यमतः शान्तिं प्रयच्छ मे। अद्येगोत्रायेत्याद्युच्चार्य निष्कत्रयपरिमित
मिदं रौप्यं रुद्रदैवतं तुभ्यमहं संप्रददे। हिरण्यं दक्षिणा च। अथ लवणदानं। यस्माद्रसाः सर्वे नोत्कृष्टा लवणं विना। शम्भोः
प्रीतिकरं नित्यमतः शान्तिं प्रयच्छ मे। अद्येगोत्रायेत्याद्युच्चार्य सार्द्धखारीपरिमितमिदं लवणं विष्णुदैवतं तुभ्यमहं संप्रददे हिर
ण्यं दक्षिणा च १० केचित्तु कनकाश्वतिलागावो दासी रथमहीगृहाः। कन्या च कपिला धेनुर्महादानानि वै दशेति कूर्मोक्तानि
वा देयानीति वदन्ति। दशदानपरिमितद्रव्यस्य प्रमाणम्। सुवर्णं निष्कमात्रं च घृतं वै प्रस्थमात्रकम्। सूक्ष्मं वस्त्रद्वयं चैव गुडमाढ
कसंमितम्। सार्द्धखारिद्वयं व्रीहिलवणं सार्द्धखारिकं। निवर्तनमिता भूमिर्द्रोणमेकमिताः तिलाः। निष्कत्रयमितं रौप्यं दशदा
नप्रमाणकम्। अथवा यथाशक्ति। दशदानमौल्यन्देयम्। तत्र प्रयोगः॥ अद्येत्याद्युच्चार्य गोभूतिलहिरण्याज्यवासोधा
न्यगुडरौप्यलवणानि दशद्रव्यनिष्क्रयभूतं द्रव्यं रजतं चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय दातुमहमुत्सृज्ये निष्क्रयेदं

वा॰प्र॰ …वःगोनिष्क्रयद्रव्यमेकस्मैब्राह्मणायदद्यान्नबहुभ्यः।तदुक्तं।अङ्गिराः।बहुभ्योनप्रदेयानिगोर्गृहंशयनंस्त्रियःविभक्त
९ दक्षिणास्त्वेतादातारन्तारयन्तिहि।बहुभ्यःप्रत्येकगोदानस्यप्रतिषिद्धत्वात् इदंचगोवृषदानमेकप्राजापत्यकृच्छ्ररूप
प्रायश्चित्तदानेत्वेयम्।दानान्तेप्रार्थना।प्रायश्चित्तहरोब्रह्माप्रायश्चित्तहरोहरिः।प्रायश्चित्तहरोरुद्रोगामेकांचददाम्यहंपु
र्वजन्मसहस्राणिपूर्वजन्मशतानिच।तत्सर्वंनाशमायातुगा———मेकान्ददतोमम।धेनुकेसर्वभूतानामखिलंपापनाशिनी॥
पापार्णवेनिमग्नानांसमुद्धरणमोस्तुते।इमानिदशदानानिदत्तानिमलशुद्धये।दानेनयज्ञपुरुषःप्रीयतान्ममेतिच॥एता
न्दशदानानिसभामध्येद्विजातिषु।तानिदेयानिदानानितेनस्यात्सर्वप्रदोभवेत्।तदसंभवेऽन्येभ्योपिदद्यात्।यन्मयाकृ
तममुकप्रायश्चित्ततन्त्रच्छिद्रमस्तु।अस्त्वच्छिद्रमितिब्राह्मणाब्रूयुः।व्रतच्छिद्रंतपश्छिद्रंयच्छिद्रंयज्ञकर्मणि।सर्वंभव
तुमेऽच्छिद्रंयस्यचेच्छन्तिवैद्विजाः।यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु।न्यूनंसंपूर्णतांयातिसद्योवन्देतमच्युतम्।मं
त्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर।यन्मयादूषितन्देवपरिपूर्णन्तदस्तुमे।कायेनवाचामनसेन्द्रियैर्वाबुद्ध्यात्मनावाप्रकृतेः
स्वभावात्।करोमियद्यत्सकलंपरस्मैनारायणायेतिसमर्पयामि॥इतिसर्वदेवप्रतिष्ठायांप्रायश्चित्तप्रकरणम्॥ अत्रारभ्यगणे राम॰
शादिदेवानांपूजनप्रकारोलिख्यते॥ १६ अतःपरंगणेशपूजनंविलिखामि।तत्राचार्यस्तुसपवित्रपाणिराच ९॥६॥ ९

प्यकृतनित्यक्रियःसपत्नीकोदक्षिणपत्न्यायथोक्तलक्षणेह्यासनेग्रन्थिबन्धनपूर्वकमुपविश्यस्वदक्षिणपार्श्वेमधूषा यथानुसारोक्तस
म्भारान्स्थापयित्वायथोक्तमण्डपेवेदाभ्यासिनोब्राह्मणानवस्थाप्यस्वदक्षिणहस्तेह्यक्षतपुष्पाणिगृहीत्वाभद्रसूक्तपठन
पूर्वकंगणेशंध्यायेत्॥ भद्रसूक्तंयथा॥ आनोभद्राइतिदशर्चस्यगोतमऋषिर्जगतीछन्दोविश्वेदेवादेवतास्वस्तिनइतिद
पस्यविराट्छन्दोभद्रंकर्णेभिरस्तुचत्रैष्टुभछन्दांसिसर्वकल्याणार्थेभद्रसूक्तपाठेविनियोगः॥तत्रपुराणोक्तभद्रसूक्तंयथा।देवाः
स्वस्तिप्रकुर्वन्तुसगणाःसाध्यास्तथा।किन्नरादेवगन्धर्वाःसाप्सराःसविनायकाः।कल्याणंचप्रकुर्वन्तुपातालस्थाःसुराःशुभाः
रसातलेषुयेदेवास्तलातलनिवासिनः १२ सुतलेवितलेदेवाह्यतलेचतलेमराः।नागाःसर्वेप्रणमाम्ययत्नकृतेः पालनायवै ३ भू
र्लोकेयेस्थितादेवाभुवर्लोकेस्थिराःसदा।भावुकंतेप्रकुर्वन्तुस्वगणाःसारसंयुताः ४ स्वर्लोकवासिनस्सर्वेपुरन्दरमुखाश्चलाः
कुशलंचसुखंदैविकंकर्मारम्भेविशेषतः ५ महर्जनतपोलोकेनिवसन्तिसवाहनाः निर्जरास्तेप्रकुर्वन्तुक्षेमंसुखप्रका
शकाः ६ सत्यलोकेप्रसीदन्तिब्रह्माणःशिखिवाहनाः।त्रिदशालेषुखासीनाभव्यंकुर्वन्तुसर्वदा। ७ ॥ रुद्रादिदेवताःसर्वा
स्तथावैकुण्ठवासिनःसगणाःपरिवारास्तेक्षेमंकुर्वन्तुनित्यशः ८ शिवयागेविष्णुयागेवास्तुकर्मणिसर्वदा।इष्टापूर्तेमहादाने
तान्देवान्संस्मरेच्चिरम् ९ तत्रसुकर्मारम्भःस्यान्निर्विघ्नेनसमापयेत् येवैनैवस्मरन्त्येतान्तेषान्नैवफलंभवेत् १० ततोग

वा॰प्र॰ १० णेशं ध्यायेत्॥ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लंबोदरश्च विकटो विघ्ननाशो विनायकः॥ ११॥ धूमकेतुर्गणाध्य
क्षो भालचन्द्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छृणुयादपि १२ विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा संग्रा
मे संकटे चैव विघ्नस्तस्य न जायते १३ शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजं प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये १४ अ
भीप्सितार्थसिध्यर्थं पूजितो यः सुरासुरैः। सर्वविघ्नछिदे तस्मै गणाधिपतये नमः १५ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके श
रण्ये त्र्यंबके गौरि नारायणि नमोस्तु ते १६ सर्वदा सर्वकार्येषु नास्ति तेषाममंगलं। येषां हृदिस्थो भगवान्मंगलायतनो हृ
रिः १७ तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव। विद्याबलं दैवबलं तदेव लक्ष्मीपते तेंघ्रियुगं स्मरामि १८ लाभस्तेषां
जयस्तेषां कुतस्तेषां पराजयः। येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः १९ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः तत्र
श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम २० सर्वेष्वारंभकार्येषु त्रयस्त्रिभुवनेश्वराः। देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः
२१ वक्रतुंड महाकाय सूर्यकोटिसमप्रभ निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा २२ विश्वेशं माधवं ढुंढिं दंडपाणिं च भैरवं। वन्दे
काशीं गुहां गंगां भवानीं मणिकर्णिकाम् २३ श्रीमन्महागणाधिपतये नमः। लक्ष्मीनारायणाभ्यां नमः। उमामहेश्वराभ्यां नमः। शची रम॰
पुरंदराभ्यां नमः। वाणीहिरण्यगर्भाभ्यां नमः। मातृपितृचरणेभ्यो नमः। कुलदेवताभ्यो नमः। इष्टदेवताभ्यो नमः। ग्रामदेवताभ्यो न १०

स्थानदेवताभ्यो नमः। वास्तुदेवताभ्यो नमः। सर्वेभ्यो देवेभ्यो नमः। सर्वेभ्यो ब्राह्मणेभ्यो नमः। प्रणवस्वरूपब्रह्मणे नमः। इति प्रणा
वं त्रिर्नमस्कृत्य प्रधानसंकल्पं कुर्यात्। तद्यथा। इह पृथिव्यां जंबूद्वीपे भारतवर्षे भरतखंडे अविमुक्तवाराणसीक्षेत्रे आन
न्दकानने आर्यावर्तैकदेशे द्वितीयपरार्द्धे श्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमस्य कलियुगस्य प्रथम च
रणे अमुकसंवत्सरे अमुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककर
णे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते सूर्ये अमुकराशिस्थिते देवगुरौ शेषग्रहेषु यथा यथा स्थानस्थितेषु सत्सु एवंगुणविशिष्टे
देशे काले च अमुकनामसपत्नीकोहं एतत्क्षेत्रावच्छिन्नभूम्यधिष्ठितदेवतापरोधजनितोपसर्गनिवृत्तिपूर्वकं मम सभार्य
स्य सपरिवारस्यायुरारोग्यपुत्रधनधान्यसंपत्प्रवृद्धये गृहाधिष्ठितवास्तुपुरुषश्रीपरमेश्वरप्रीत्यर्थं सनवग्रमखं वास्तु
शांतिं करिष्ये। शिवादिप्रतिष्ठायां विशेषः अस्यां विष्ण्वादिमूर्तौ लिंगवा देवकलासंनिध्यार्थं आयुः श्रीसर्वफलावाप्य
सुखकामः श्रीपरमेश्वरप्रीत्यर्थं च स्वकृतशैलप्रासादसहितविष्णुमूर्तेः स्थिरप्रतिष्ठां करिष्ये। तत्तत्कामेषु तत्तद्देवेषु तत्तत्प
दं यथार्थमूह्यम्। तदंगत्वेन स्वस्तिपुण्याहवाचनमातृकापूजनवसोर्द्धारायुष्यजपनान्दीश्राद्धाचार्यवरणपूर्वकं मधुपर्का
द्यर्चनं च करिष्ये। तदंगत्वेन निर्विघ्नतासंसिद्ध्यर्थं गणेशांबिकयोः पूजनं च करिष्ये॥ तद्यथा। पीठेषु अक्षतपुंजेषु स्व

वा·प्र· णोदिमूर्तिषुवागणपतिंगौरींचावाहये।हेहेरंबत्वमेह्येहिअंबिकात्र्यंबकात्मजसिद्धिबुद्धिपतेत्र्यक्षलक्षलाभकयोःपितः।नागास्य
११ नागहारत्वंगणराजचतुर्भुज।भूषितःस्वायुधैर्दिव्यैःपाशांकुशपरश्वधैः।आवाहयामिपूजार्थंरक्षार्थंचममक्रतोः।।
इहागत्यगृहाणत्वंपूजांक्रतुंचरक्षमे।सिद्धिबुद्धिसहितगणपतेइहागच्छइहतिष्ठ।सिद्धिबुद्धिसहितायगणपतयेनमः।गणानां
त्वेत्यस्यप्रजापतिऋषिर्यजुश्छंदोगणपतिर्देवताअर्चनेविनियोगः।अंबे॰अंबिकइत्यस्यप्रजापतिऋषिरनुष्टुप्छंदोंबिकादे
वताअंबिकार्चनेविनियोगः।मनोजूतिरित्यस्यांगिरसोबृहस्पतिर्ऋषिर्यजुश्छन्दोविश्वेदेवादेवताःदेवस्यप्राणप्रतिष्ठाप
नेविनियोगः।हेमाद्रितनयांदेवींवरदांभैरवप्रियां।आवाहयेंबिकांपुत्रकर्मनिर्विघ्नसिद्धये।अंबिकइहागच्छइहतिष्ठ।अं
बिकायैनमः।अंबिकामा॰।एषुवाक्यानपुंजेषुपूगीफलसुमूर्तिषु।पूजार्थंवैप्रतिष्ठामिसुप्रतिष्ठसुरेश्वर।।अनेनप्रति
ष्ठांकुर्यात्।।अलंकारसमायुक्तंमुक्तामणिविभूषितम्।स्वर्णसिंहासनंचारुप्रीत्यर्थंप्रतिगृह्यतां।इदमासनंसमर्पयामि।।
गौरीसुतनमस्तेस्तुशंकरप्रियकारक।भक्त्यापाद्यंमयादत्तंगृहाणप्रणतप्रिय।इतिपाद्यंसमर्पयामि।।व्रतमुद्दिश्यविघ्नेशगंग
धपुष्पादिसंयुतं।।गृहाणार्घ्यंमयादत्तंसर्वसिद्धिप्रदायकं।।इदमर्घ्यंसमर्पयामि।।गणाधिपनमस्तुभ्यंगौरीसुतगजा राम·
नन।।गृहाणाचमनीयंत्वंसर्वसिद्धिप्रदायकं इदमाचमनीयंजलंसमर्पयामि।। पयःपवित्रमतुलंयतःसुर॰।। ११

भिसंभवं।सुस्निग्धंमधुरंदेवस्नानार्थंप्रतिगृह्यतां।इदंपयःस्नानंसमर्पयामि मधुरंचन्द्रसंकाशंमंगलंपरमंमहत्।।स्ना
नार्थंतेप्रयच्छामिगृहाणगणनायक।इदंदधिस्नानंसमर्पयामि।। पयःसारंसुखंहृद्यंसर्वदेवप्रियंघृतम्।स्नानार्थं
तेप्रदास्यामिगृहाणप्रभुसुरसत्तम।।इदंघृतस्नानंसमर्पयामि।सर्वौषधिसमुद्भूतंमधुक्षौद्रंसुरेश्वर।स्नानार्थंगृहाणत्वंप्रस
न्नोजन्मजन्मनि।।इदंमधुस्नानंसमर्पयामि।।हेरंबसर्वभूतानांवल्लभंपार्वतीसुत।कषायंशुद्धमधुरंतेनस्नानंकुरुप्र
भो।। इदंशर्करास्नानंसमर्पयामि।। गणनाथनमस्तुभ्यंपाहिमांवरदर्षभ।स्नानंशुद्धोदकेनैवकुरुत्वंवैनिजेच्छया
।इदंशुद्धोदकस्नानंसमर्पयामि। स्नानोत्तरमाचमनीयंजलंसमर्पयामि ।।वेदसूक्तसमायुक्तेयज्ञसामसमन्वितेसर्वव
र्णप्रदेदेववाससीतेविनिर्मिते।वस्त्रोत्तरमिदमाचमनीयंजलंस॰।ब्रह्मविष्णुमहेशानैर्निर्मितंब्रह्मसूत्रकं।यज्ञोप
वीतंदानेनप्रीयतांशिवपुत्रकः।तदुत्तरमाचमनंजलंस॰।गंधकर्पूरसंयुक्तंकुंकुमेनसुवासितं।विलेपनंसुरश्रेष्ठप्री
त्यर्थंप्रतिगृह्यतां।इदंगंधंस॰।अक्षतान्तंदुलान्शुभ्रान्कुंकुमेनविराजितान्।मयानिवेदितान्भक्त्यागृह्यतांचसुरेश्वर
।।अक्षतान्स॰।।माल्यादीनिसुगंधीनिमालत्यादीनिवैप्रभो।दत्तानितुभ्यंदेवेशपुष्पाणिप्रतिगृह्यताम्।इमानिपुष्पा
णिस॰।दूर्वेह्यमृतजन्मासिगणेशस्यसदाप्रिया।भक्त्यातुभ्यंप्रदास्यामिप्रसन्नोभवसर्वदा।इमान्दूर्वांकुरान्स॰।वनस्पतिर

वा॰प्र॰ सोऽमृतो गंधाढ्यो गंधउत्तमः। आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां॥ इदं धूपं स॰। आज्यावर्त्तिसंयुक्तं वन्हिना योजितं मया। दीपं गृ-
१२ हाण देवेश त्रैलोक्यतिमिरापहं। इदं दीपं स॰ अनेकस्वादुसंयुक्तं नानाफलसमन्वितं॥ पायसं मोदकं चैव गृहाण परमे-
श्वर॥ इदं नैवेद्यं स॰। गणाधिप नमस्तुभ्यं गौरीसुत गजानन। गृहाणाचमनीयं त्वं सर्वसिद्धिप्रदायक। इदमाचमनं स॰ करो-
द्वर्त्तनार्थं चन्दनं स॰॥ हिरण्यगर्भगर्भस्थं हेमवीजं विभावसोः। अनंतपुण्यफलदमतः शान्तिं प्रयच्छ मे। नगरागसमुद्भूतम-
भ्रकं सुरपूजितं॥ इदं परिमलं द्रव्यं सिंदूरं गृह्यतां प्रभो॥ इदं परिमलद्रव्यं समर्पया॰ अनेकतीर्थभ्रमणाद्यत्पुण्यं लभते
नरः। तत्पुण्यं लभते पुंसा देवस्यैव प्रदक्षिणात्। अर्घपात्रे रक्ताक्षतपुष्पफलान्वितं गृहीत्वा। रक्ष रक्ष गणाध्यक्ष रक्ष त्रै-
लोक्यरक्षक। भक्तानामभयं कर्त्ता त्राता भव भवार्णवात्। द्वैमातुर कृपासिंधो षाण्मातुराग्रज प्रभो। वरदस्त्वं वरं देहि वा-
ञ्छितं वाञ्छितार्थद। अनेन फलदानेन फलदोस्तु सदा मम। सिद्धिबुद्धिसहिताय श्रीमन्महागणाधिपतये नमः। विशेषा-
र्घं स॰ अर्घं दत्वा प्रार्थयेत्। विघ्नेश्वराय वरदाय सुरप्रियाय लंबोदराय सकलाय जगद्धिताय। नागाननाय श्रुतियज्ञविभूषि-
ताय गौरीसुताय गणनाथ नमो नमस्ते। भक्तार्त्तिनाशनपराय गणेश्वराय सर्वेश्वराय शुभदाय सुरेश्वराय। विद्याधराय राम॰
विकटाय च वामनाय भक्तप्रसन्नवरदाय नमो नमस्ते। नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः। नमस्ते रुद्ररूपाय १२

करिरूपाय ते नमः। विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे। भक्तप्रियाय देवाय नमस्तुभ्यं विनायक। लंबोदर नमस्तुभ्यं
सततं मोदकप्रिय। निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा। त्वां विघ्नशत्रुदलनेति च सुंदरेति भक्तप्रियेति सकलेति फलप्र-
देति। विद्याप्रदेत्यघहरेति च ये स्तुवंति तेभ्यो गणेश वरदो भव नित्यमेव। इति संप्रार्थ्य। अनया पूजया गणेशांबिके प्रीयेताम्
वेदोक्तपूजनेन तत्‌दूस्त्वर्पणेन तन्मंत्रोह्यः। अथ स्वस्तिवाचनं। स्वाग्रतः शुद्धायां भूमौ ह्यष्टदलं विरचय्य तत्र। पृथ्वी त्वया धृ-
ता लोका देवि त्वं विष्णुना धृता। कलशाधारभूतं हि पवित्रं कुरु चासनं। मही द्यौरिति भूमिस्पर्शः। यवोसि धान्यराजस्त्वं सर्वो-
त्पत्तिकरः शुभः। प्राणिनां जीवनोपायः कलशाधः क्षिपाम्यहं। धान्यमसीति धान्यं क्षिपेत्। कलाकला हि देवानां दानवानां
कलाकलाः। संगृह्य निर्मितो यस्मात्कलशस्तेन उच्यते। आजिघ्रेति कलशस्थापनं। आपस्त्वमसि देवेश ज्योतिषां प-
तिरव्यय। भूतानां जीवनोपायः कलशे पूरयाम्यहं। वरुणस्योत्तंभनमसीति कलशे जलं पूरयेत्। श्रीखंड चन्दनं दिव्यं
गंधाढ्यं सुमनोहरं। विलेपनं सुगंधाय कलशे संक्षिपाम्यहं। त्वां गंधर्वा इति गंधः। सर्वौषध्यः सुगंधाढ्या दिव्यहर्षिस-
मुद्भवाः। कलशाप्यायनकरा मंगलाय क्षिपाम्यहं। या ओषधीरित्योषधीः। पक्षियक्षसंभूतान्पल्लवान्सरसाञ्छु-
भान्। अलंकाराय पंचैतान्कलशे संक्षिपाम्यहं। अश्वत्थेवः। अंबे ऽ अंबिके इति पंचपल्लवान्। दूर्वेह्यमृतसंपन्ने शतमू-

वा.प्र. लेशनांकुरे। शतं मे हर पापानि शतमायुर्विवर्द्धिनी। कांडात्कांडादिति दूर्वांकुरान्। रत्नगर्भो भवाद्भूमी रत्नगर्भाद्द्वयं भूधराः कलशे
१३ रत्नगर्भः स्यात्तस्माद्रत्नान्यहं क्षिपे। परिवाजपतिरिति पंचरत्नानि। इदं फलं मया सम्यक् प्रक्षिप्तं कलशे यतः। तेनायं कलशः स
म्यक् फलवानस्तु सर्वदा। याः फलिनीरिति पूगं। हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनंतपुण्यफलदं कलशे संक्षि
पाम्यहं। हिरण्यगर्भः समिति हिरण्यं। शरण्ये सर्वलोकानां लज्जाया रक्षणं परं। सुवेशधारि वस्त्रं हि कलशे वेष्टयाम्यहं॥
युवा सुवासा इति वस्त्रेण सूत्रेण वा वेष्टनं। धान्यपूर्णमिदं पात्रं स्थापितं कलशे यतः। तेनायं कलशः पूर्णः पूर्णास्सन्तु मनोरथाः
। पूर्णा दर्वीति पूर्णपात्रं। एवं कलशं संस्थाप्य तत्र वरुणमावाहयेत्। मकरस्थं पाशहस्तमपांपतिं समीश्वरं आवाहये प्र
तीचीशं वरुणं यादसांपतिं। सांगाय सपरिवाराय वरुणाय नमः। वरुणेहागच्छेहातिष्ठ सुप्रतिष्ठितो भव। तत्त्वायामीति वरुणमा
वाह्य मनो जूतिरिति प्रतिष्ठाप्य पूजयेत्। तत्र तीर्थान्यावाहयेत्। सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः। आयातु मम शान्त्य
र्थं दुरितक्षयकारकाः। कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः। मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः। कुक्षौ तु
सागराः सप्त सप्तद्वीपा वसुंधरा। ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः। अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः। अत्र गाय राम.
त्री सावित्री शांतिः पुष्टिकरी तथा। आयान्तु मम कार्यार्थं पापानां क्षयकारकाः। इति तीर्थान्यावाह्य प्रार्थयेत्। देवदानवसंवादे मथ्यमा १३

नेमहोदधौ। उत्पन्नोऽसि तदा कुंभ विधृतो विष्णुना स्वयं। त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः। त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः
प्रतिष्ठिताः। शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः। आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः। त्वयि तिष्ठन्ति सर्वेऽपि यतः का
मफलप्रदाः। त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव। सांनिध्यं कुरु मे देव प्रसन्नो भव सर्वदा। नमो नमस्ते स्फटिकप्रभाय सुश्वेत
हाराय सुमंगलाय सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते। पाशपाणे नमस्तुभ्यं पद्मिनीजीवनाय च। पुण्याहवा
चनं यावत्तावत्त्वं संनिधो भव। इति संप्रार्थ्य। अथ पुण्याहवाचनम्। अवनिकृतजानुमंडलं कमलमुकुलसदृशमंजलिं शिरस्याधा
य दक्षिणेन पाणिना सुवर्णपूर्णकलशं धारयित्वा दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च। तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घमा
युरस्तु। विष्णोः पदभ्यां प्रक्रमेण तारस्या भवति निश्चला। अनन्ताभ्यो रक्षणेभ्यो धर्मान्संधारयेत्सुमान्। इति त्रिः पठित्वोपविष्टना
ब्राह्मणानां करे जलानि यजमानः प्रक्षिपेत्। अत्र पूर्ववचनं यजमानस्यापरवचनं ब्राह्मणानां। शिवा आपः सन्तु। सन्तु शि
वा आपः। सौमनस्यमस्तु। अस्तु सौमनस्यं। अक्षतं चारिष्टं चास्तु। अस्त्वक्षतमरिष्टं च। गंधाः पांतु। सौमंगल्यं चास्तु। अक्षताः
पांतु। आयुष्यमस्तु। पुष्पाणि पांतु। सौश्रियमस्तु। ताम्बूलानि पांतु। ऐश्वर्यमस्तु। दक्षिणाः पांतु बहुदेयं चास्तु। इति गंधादिद
त्वा प्रार्थयेत्। दीर्घमायुः शांतिः पुष्टिस्तुष्टिः श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं बहुधनं चायुष्यं चास्तु। यं कृत्वा सर्ववेदय

या॰प्र॰ ङ्क्रियाकरणकर्मारंभाः शुभाः शोभनाः प्रवर्तन्ते। तमहं नमस्कारमादिं कृत्वा यजुराशीर्वचनं बहुऋषिमतं समनुज्ञातं भवद्भि
१४ रनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये इति यजमानः। वाच्यतां ३ ब्राह्मणा ब्रूयुः। ततो ब्राह्मणानां हस्ते स्वस्तिनान्दत्वा। करोतु स्वस्ति ते
ब्रह्मा स्वस्ति चापि द्विजातयः। स्वस्ति तेस्तु द्विपादेभ्यश्चतुष्पादेभ्य एव च। स्वस्त्यस्त्वपादकेभ्यश्च सर्वेभ्यः स्वस्ति ते सदा। स्वाहा स्व
धा शची चैव स्वस्ति कुर्वन्तु ते सदा। करोतु स्वस्ति वेदादिर्नित्यं तव महामखे। लक्ष्मीरुद्रं धनी चैव कुरुतां स्वस्ति ते सदा। असितो दे
वलश्चैव ॱ विश्वामित्रस्तथांगिराः। वसिष्ठः कश्यपश्चैव स्वस्ति कुर्वन्तु ते सदा। धाता विधाता लोकेशो दिशश्च सदिगीश्वराः। स्वस्ति ते
घप्रयच्छन्तु कार्तिकेयश्च षण्मुखः। विवस्वान्भगवान्स्वस्ति करोतु तव सर्वदा। दिग्गजाश्चैव चत्वारः क्षितिश्च गगनं ग्रहाः। अधस्ता
द्धरणीं चासौ नागो धारयते हि सः। शेषश्च पन्नगश्रेष्ठः स्वस्ति तुभ्यं प्रयच्छतु। भद्रं कर्णेभिः द्रविणोदाः। सविता त्वा ततदूस्याथं
सि उद्याते। उपास्मै। इत्येतैर्ऋग्भिराशीर्ददुः। ततो यजमानः। व्रतजपतपोनियमस्वाध्यायक्रतुदमदयादानविशिष्टानां सर्वे
षां ब्राह्मणानां मनः समाधीयतां। इति वदेत्। समाहितमनस्काः इति ब्राह्मणाः। प्रसीदन्तु भवंतः। इति यजमानः। प्रसन्नाः स्म इति
ब्राह्मणाः। ततः कुंभाज्जलं पात्रयन्प्रार्थयन्वा ॱ कलशोपर्यस्ततान्प्रदद्यजमानो निविष्यद्वाति वदेत् जलधारा सततान्वा पातये राम॰
त् नान्यथा। शांतिरस्तु। पुष्टिरस्तु। अविघ्नमस्तु। आयुष्यमस्तु। आरोग्यमस्तु। शिवंमस्तु॥ शिवं कर्मास्तु॥ कर्मसमृद्धिरस्तु॥ ः १४

धनधान्यसमृद्धिरस्तु। पुत्रपौत्रसमृद्धिरस्तु। इष्टसंपदस्तु। पात्राद्बहिर्देशे द्वितीयपात्रे पातयेत्। अरिष्टनिरसनमस्तु। यत्पाप
रोगमकल्याणं तद्दूरे प्रतिहतमस्तु पुनः पूर्व पात्रे। यच्छ्रेयस्तदस्तु। उत्तरे कर्मणि निर्विघ्नमस्तु। उत्तरोत्तरमहरहरभिवृद्धिरस्तु। उत्तरो
त्तराः क्रियाः शुभाः शोभनाः संपद्यंतां। तिथिकरणमुहूर्तनक्षत्रग्रहलग्नसंपदस्तु तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेव
ताः प्रीयं ॱ तां तिथिकरणे समुहूर्ते सनक्षत्रे सग्रहे सलग्ने सदेवते प्रीयेतां। दुर्गापांचाल्यौ प्रीयेतां। अग्निपुरोगा वि
श्वेदेवाः प्रीयंतां। इन्द्रपुरोगा मरुद्गणाः प्रीयंतां। वसिष्ठपुरोगा ऋषिगणाः प्रीयंतां। माहेश्वरीपुरोगा उमामातरः प्रीयंतां। अरुंध
तिपुरोगा एकपत्न्यः प्रीयंतां। ब्रह्मपुरोगाः सर्वे वेदाः प्रीयंतां। विष्णुपुरोगाः सर्वे देवाः प्रीयंतां। ब्रह्म च ब्राह्मणाश्च प्रीयंतां। श्री
सरस्वत्यौ प्रीयेतां। श्रद्धामेधे प्रीयेतां। भगवती कात्यायनी प्रीयतां। भगवती माहेश्वरी प्रीयतां। भगवती पुष्टिकरी प्रीय
तां। भगवती तुष्टिकरी प्रीयतां। भगवती ऋद्धिकरी प्रीयतां। भगवती वृद्धिकरी प्रीयतां। भगवान्विघ्नविनायकः प्रीयतां।
सर्वाः कुलदेवताः प्रीयंतां। सर्वा इष्टदेवताः प्रीयन्तां। सर्वा ग्रामदेवताः प्रीयंतां। बहिः हताश्च ब्रह्मद्विषः। हताश्च परिपंथि
नः। हताश्च विघ्नकर्तारः शत्रवः पराभवं यांतु। शाम्यंतु घोराणि शाम्यन्तु पापानि। शाम्यंत्वीतयः। पात्रे शुभानि वर्द्धन्तां। शि
वा आपः संतु। शिवा ऋतवः संतु। शिवा अतिथयः संतु। शिवा ओषधयः संतु। शिवा वनस्पतयः संतु। शिवा अग्नयः संतु।

शिवा नद्यः सन्तु। शिवा गिरयः संतु। शिवा आहुतयः संतु॥ अहोरात्रे शिवे स्यातां शुक्रांगारकबुधबृहस्पतिशनैश्चरराहु
केतु सोमसहिता। आदित्यपुरोगाः सर्वे ग्रहाः प्रीयंतां। भगवान्नारायणः प्रीयतां भगवान्पर्जन्यः प्रीयतां। भगवान्स्वामी
महासेनः प्रीयतां। पुरोनुवाक्यया यत्पुण्यं तदस्तु। याज्यया यत्पुण्यं तदस्तु वषट्कारेण यत्पुण्यं तदस्तु। प्रातः सूर्योदये
यत्पुण्यं तदस्तु॥ एतत्कल्याणयुक्तं पुण्यं पुण्याहकलान्वाचयिष्ये॥ इति यजमानः॥ वाच्यतां॥ इति ब्राह्मणाः॥
ब्राह्मं पुण्यं महर्यच्च सृष्ट्युत्पादनकारकं। वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवंतु नः॥ भो ब्राह्मणाः मम सकुटुंबस्य
सपरिवारस्य गृहे कर्तव्य सप्रासादसग्रहमखाचलसपरिवारसर्वदेवप्रतिष्ठाकर्मणः पुण्याहं भवन्तो ब्रुवन्तु।
॥इति ब्राह्मणान्प्रति मंद्रमध्यमोच्चस्वरेण त्रिर्ब्रूयात्॥ ब्राह्मणाः स्वस्ति पुण्याहं। इति तत्स्वरेण त्रिर्ब्रूयुः॥ दीयंते
यत्र दानानि पूज्यंते च द्विजातयः॥ दृश्यंते यत्र मांगल्यं तत्पुण्याहं सदास्तु मे॥ पुनंतु मेति मंत्रपाठः। इत्यपि स
कृदेव ब्रूयुः॥ अनेनैव प्रकारेण पंचस्वपि वाक्येषु न्यासः कार्यः॥ पृथिव्यामुद्धृतायां तु यत्कल्याणं पुरा कृतं॥ ऋ
षिभिः सिद्धगंधर्वैस्तत्कल्याणं ब्रुवन्तु नः॥ भो ब्राह्मणाः मम सकुटुंबस्य सपरिवारस्य गृहे कर्तव्यामुककर्मणः 
कल्याणं भवन्तो ब्रुवन्तु। त्रिः। ब्राह्मणाः स्वस्ति कल्याणं त्रिः॥ कलत्रपुत्रपौत्रादि द्विपदाश्च चतुष्पदाः॥ तिष्ठंति 

समगृह्य

यत्र भृत्याद्यास्तत्कल्याणं सदास्तु ते॥ यथेमामिति पठेत्॥ यथा ऋद्धिर्महाराज्ञ्यादिभिः कृता॥ संपूर्णा सुप्रभा वा च ऋ
द्धिं तां च ब्रुवन्तु नः॥ भो ब्रा० कर्मण ऋद्धिं भवन्तो० त्रिः ब्रा० स्वस्ति ऋध्यतां त्रिः॥ धनधान्यधरा धर्मनिधिकोशगृहाणि
च॥ ध्रुवाणि यत्र तिष्ठंति सा ऋद्धिः सर्वदास्तु ते॥ सत्रस्य ऋद्धिः॥ स्वस्ति यज्ञाविनाशाख्या पुण्यकल्याणवृद्धिदा।
विनायकप्रिया नित्यं स्वस्ति नश्च ब्रुवंतु नः॥ भो ब्रा० कर्मणे स्वस्ति० ३ ब्र० ब्र०॥ आयुष्मते स्वस्ति त्रिः॥ दीर्घायुष्ट्वं च सत्यं
च मांगल्यं यत्र तिष्ठति भूदेवभक्तितस्स्वस्ति सर्वदास्तु गृहे तव॥ स्वस्ति नः॥ समुद्रमथनाज्जाता जगदानंदकारका
॥ हरिप्रिया च मांगल्या श्रियं तां च ब्रुवन्तु नः॥ भो ब्रा० कर्मणः श्रीरस्त्विति भवंतो ब्रुवंतु॥ ब्रा० अस्तु श्रीः त्रिः श्रिया
॥ हरिप्रिया च मांगल्या श्रियं तां च ब्रुवन्तु नः॥ भो ब्रा० कर्मणः श्रीरस्त्विति भवंतो ब्रुवंतु॥ ब्रा० अस्तु श्रीः त्रिः शिवगौ
रीविवाहे या या श्री रामे नृपात्मजे॥ धनदस्य गृहे या श्रीः सा श्रीरस्तु गृहे तव॥ मनसः काममिति पठेत्॥ पंचभि
रेव मंत्रैः पुण्याहवाचनं क्रियन्ते परन्तु केचिदेमान्युक्ता अपि ह्यधिकामंत्रा पठंति तत्र के॥ यथा॥ मृकंडसूनोरा
युर्यद्ध्रुवलोमशयोस्तथा॥ आयुषा तेन संयुक्ता जीवेम शरदः शतम्॥ इति यजमानवचनं॥ ब्राह्मणाः॥ मार्कं
डेयप्रसादेन सुस्थिराश्चिरजीविनः॥ तथा त्वं भव दीर्घायुः पुत्रपौत्रगणैः सह॥ शतमिन्नु इति पठेत्॥ आयु
ष्मते स्वस्तिमते यजमानाय दाशुषे॥ श्रियै दत्ताशिषः सन्तु ऋत्विग्भिर्वेदपारगैः॥ प्रतिपंथामिति प०॥ प्रजा

वा॰ पतिर्लोकपालो धाता ब्रह्मा च देवराट् भगवाञ्छंभुश्चैते नित्यं संरक्षन्तु च नः सदा ॥ प्रजापतिः प्रीयताम् ॥ पुण्याहवा
प्र॰ चनसमृद्धिरस्तु ॥ यजमानो ब्रूयात् ॥ ततः पत्नीवामस्थयजमानस्य पुण्याहवाचने ब्राह्मणैरभिषेकः कार्यः ॥ तत्र
१६ नि विस्पर्द्धे जलसेके कृते तज्जलेन प्रार्थनापक्षे तेनैव कलशेनोदङ्मुखास्तिष्ठन्तो ब्राह्मणा अभिषिंचेयुः ॥ तत्र
मंत्राः आपोहिष्ठेति तिसृभिर्ऋग्भिः ॥ देवस्यत्वेति तिसृभिर्ऋग्भिः ॥ विश्वानि देवा धामच्छन्दोगैः ॥ त्वं यविष्ठ ॥ अ
न्तपते नमस्ते ॥ द्यौः शान्तिः ॥ यतो यतः ॥ सुरास्त्वामभिषिंचन्तु ब्रह्मविष्णुमहेश्वराः ॥ वासुदेवो ज— गन्नाथस्तथा
संकर्षणो विभुः ॥ प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ॥ आखंडलोऽग्निर्भगवान्यमो वै निर्ऋतिस्तथा वरु
णः पवनश्चैव धनाध्यक्षः सदाशिवः ॥ ब्रह्मणा सहिताः सर्वे दिक्पालाः पान्तु ते सदा ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा
पुष्टिः श्रद्धा क्रिया मतिः ॥ बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः ॥ एतास्त्वामभिषिंचन्तु देवपत्न्यः
समागताः ॥ आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ॥ ग्रहास्त्वामभिषिंचन्तु राहुकेतुश्च तर्पिताः ॥ देव
दानवगंधर्वा यक्षराक्षसपन्नगाः ॥ ऋषयो मनवो गावो देवमातर एव च ॥ देवपत्न्यो द्रुमा नागा दैत्याश्चाप्स राम॰
रसां गणाः ॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ॥ औषधानि च रत्नानि कालस्यावयवाश्च ये ॥ सरितः साग १६

राः शैलास्तीर्थानि जलदा नदाः ॥ एते त्वामभिषिंचन्तु सर्वकामार्थसिद्धये ॥ अमृताभिषेकोऽस्तु ॥ ततो यजमानः स्वशुध्यर्थमाचम्य ॥
ततो दक्षिणासंकल्पः ॥ देशादिस्मृत्वा स्वस्तिपुण्याहवाचकेभ्यो ब्राह्मणेभ्यो यथाशक्तिपरिमितां दक्षिणां विभज्य दातुम
मुत्सृज्य ॥ ततः कृताञ्जलिर्यजमानोऽस्मिन्पुण्याहवाचने न्यूनातिरिक्तो यो विधिः स उपविष्टब्राह्मणवचनाच्छ्रीमहागणपति
प्रसादात्परिपूर्णतामस्तु ॥ अस्तु परिपूर्णमिति ब्राह्मणा ब्रूयुः ॥ इति स्वस्तिपुण्याहवाचनम् ॥ ततो मातृपूजा रक्तवस्त्रास्तृतपीठेऽक्ष
तपुंजेषु पूगीफलेषु मूर्तिषु वा दक्षिणोपक्रमाणामपवर्गाणां प्रत्यगुपक्रमाणां प्रागपवर्गाणां वा गौर्यादिमातृणां सगणाधि
पानाम् ॥ तद्यथा ॥ समीपमातृवर्गस्य सर्वविघ्नहरं सदा ॥ त्रैलोक्यवंदितं देवं गणेशं स्थापयाम्यहं ॥ गणानांत्वेति ॥ भो गणपत
इहागच्छेह तिष्ठ ॥ गणपतये नमः ॥ गणपतिमावाहयामि स्थापयामि ॥ हेमाद्रितनयां देवीं वरदां शंकरप्रियां ॥ लंबोदर
स्य जननीं गौरीमावाहयाम्यहं ॥ आयंगौरिति ॥ गौर्यै नमः ॥ गौरीमावाहयामि स्थापयामि ॥ भो गौरि इहागच्छेह तिष्ठ ॥ पद्मा
भां पद्मवदनां पद्मनाभीपरिस्थितां ॥ जगत्प्रियां पद्मवासां पद्मामावाहयाम्यहं ॥ हिरण्यरूपा उषसः इति पद्मायै नमः ॥ प
द्मामावाहयामि स्थापयामि ॥ भो पद्मे इहागच्छेह तिष्ठ ॥ दिव्यरूपां विशालाक्षीं शुचिकुंडलधारिणीं ॥ रक्तमुक्ताद्यलंकारां
शचीमावाहयाम्यहं ॥ कदाचनेति ॥ शच्यै नमः ॥ शचीमावाहयामि स्थापयामि ॥ मेधां मेत्रवरुण इति ॥ मेधायै नमः ॥ मेधामावाह

वा० यामिस्थापयामि।मेधेइहागच्छेहातिष्ठ।जगत्सृष्टिकरींधात्रींदेवींप्रणवमातृकां।वेदगर्भांक्रतुमयींसावित्रींस्थापयाम्यहम्
प्र० ।सावित्र्यैनमः।सावित्रीमावाहयामिस्थापयामि।भोसावित्रिइहागच्छेहातिष्ठ।उपयामगृहीतोसिसावित्रोसि।सर्वास्त्रधारिणीं
१७ देवींसर्वाभरणभूषितां।सर्वदेवनुतांध्यातांविजयांस्थापयाम्यहम्।विज्यंधनुरिति।विजयायैनमः।विजयामावाहयामिस्थाप
यामिविजयेइहागच्छेहातिष्ठ।सुरारिमथिनींदेवींदेवानामभयप्रदां।त्रैलोक्यवंदितांदेवींजयामावाहयाम्यहं।जयायैनमः॥
जयामावाहयामिस्थापयामि।जयेइहागच्छेहातिष्ठ।ऽयानेरुद्रेति।मयूरवाहनांदेवींखड्गशक्तिधनुर्धरां।आवाहये
देवसेनांतारकासुरमर्दिनीं।देवानांभद्रेति।देवसेनायैनमः।देवसेनामावाहयामिस्थापयामि।भोदेवसेनेइहागच्छे।
हातिष्ठ।कव्यमादायसततंपितृभ्योयाप्रयच्छति।पितृलोकार्चितांदेवींस्वधामावाहयाम्यहम्।पितृभ्यःस्वधायिभ्यइतिस्व
धायैनमः।स्वधामावाहयामिस्थापयामि।स्वधेइहागच्छेहातिष्ठ।हविर्गृहीत्वासततंदेवेभ्योयाप्रयच्छति।तांदिव्यरू
पांवरदांस्वाहामावाहयाम्यहं।स्वाहयज्ञमितिस्वाहायैनमः।स्वाहामावाहयामिस्थापयामि।स्वाहेइहागच्छेहातिष्ठ।
आवाहयाम्यहंमातृःसकलालोकपूजिताः।सर्वकल्याणरूपिण्यावरदादिव्यभूषिताः॥आपोऽअस्मानितिमातृभ्योन रम.
मः॥मातृःआवाहयामिस्थापयामि।भोमातरइहागच्छतेहातिष्ठत।आवाहयेलोकमातृर्जयंतीप्रमुखाःशुभाः।नाना १७

भीष्टप्रदाःशान्ताःसर्वलोकहितावहाः।उरुंवाहरणोत्विति।लोकमातृभ्योनमः।लोकमातृःआवाहयामिस्थापयामि।भोलोक
मातरइहागच्छतेहातिष्ठत।सर्वहर्षकरींदेवींभक्तानामभयप्रदां।हर्षोत्फुल्लास्यकमलांधृतिमावाहयाम्यहं।धृतिरसीति।धृत्यै
नमः।धृतिमावाहयामिस्थापयामि।भोधृतिइहागच्छेहातिष्ठ॥पोषयन्तींजगत्सर्वंस्वदेहप्रभवान्नयांबहुपुष्टिकरींदेवीं
पुष्टिमावाहयाम्यहं।पुष्ट्यैनमः।पुष्टिमावाहयामिस्था०भोपुष्टिइहागच्छेहातिष्ठ।त्वष्टातुरीपइति।आवाहयामिसंतुष्टिं
सूक्ष्मवस्त्रान्वितांशुभां।संतोषोभविताचात्ररक्षणायाहूरेशुभे।तुष्ट्यैनमः।तुष्टिमावाहयामिस्था०।भोतुष्टिइहागच्छेहातिष्ठ।
अर्यमणमिति।आत्मनोदेवतांदेवीमैश्वर्यसुखदायिनीं।वंशवृद्धिकरींनित्यांधनदेवींकुलांबिकां।आत्मनःकुलदेवतायैन
मः।आत्मनःकुलदेवतामावाहयामिस्था०।गणेशपूर्विकादेव्योगौर्यादिप्रमुखाःस्मृताः।प्रसीदमकल्याणपोनिर्विघ्नंवोस्तुनोध्व
रं।ततोघृतमातृणांपूजनम्।वसोर्धाराचकार्यैयंप्रत्येकंत्रिसंख्यकाः।अयुग्माःस्थापनीयास्तानातिनीचानचोच्छ्रिताः।कु
ड्यलग्नावसोर्धाराःपंचवाघृतेनतु।कारयेत्सप्तधारावानातिन्यूनाकदाचन॥नागवल्लीदलेनैवशुभेनपल्लवेनवा।धारांतुपा
तयेत्सम्यगभितोमेलयेत्ततः।गुडेनपूर्वसंस्थाश्चाहुर्वक्तस्याग्निकोणगाः।पीठेचैवंप्रकारेणचतुष्षष्टिंप्रपूजयेत्।श्रीश्चलक्ष्मी
धृतिर्मेधापुष्टिःश्रद्धासरस्वती।मांगल्येषुप्रपूज्यन्तेसप्तैताघृतमातरः।धारादानमंत्रः।नमोस्तुवसुमातृभ्योघृतमातृभ्यएवचास्व

यत्नकार्यसिध्यर्थीधारं दास्यामि मानरः ॥ मातृमेलनमंत्रः। श्रियादिसप्तमातृभ्यो घृतमातृभ्य एव च। गुडेन मेलयिष्यामि त्वाः स
र्वार्थप्रसाधिकाः। दक्षिणदिगारभ्योदगंतं मेलयेत् ५ सुवर्णपद्महस्तां तां विष्णोर्वक्षस्थलेस्थिताम्। त्रैलोक्यवल्लभां
देवीं श्रियमावाहयाम्यहं श्रियै नमः श्रियमावाहयामि। मनसः काममिति। शुभलक्षणसंपन्नां क्षीरसागरसंभवाम्। चन्द्रस्वभ
गिनीं सौम्यां लक्ष्मीमावाहयाम्यहं। लक्ष्म्यै नमः। लक्ष्मीमावाहयामि स्थापयामि। श्रीश्च त इति। संसारधारणपरां धैर्यलक्षणसं
युतां॥ सर्वसिद्धिकरीं देवीं धृतिमावाहयाम्यहं। इहरतिरिति। सदसत्कार्यकरणसमां बुद्धिविशालिनीं। मम कार्ये शुभकरीं मे
धामावाहयाम्यहं। मेधां मइति। सोमरूपां सुवर्णाभां विद्युज्ज्वलितकुंडलां। जननीं पुष्टिकरणीं पुष्टिमावाहयाम्यहं। देवी जोष्ट्रीति। भूत
ग्राममिदं सर्वमजेन श्रद्धया कृतं। श्रद्धया प्राप्यते सत्यं श्रद्धामावाहयाम्यहं। श्रुते नदीक्षामिति। प्रणवस्यैव जननीं रसनाग्रस्थि
तां सदा। प्रगल्भप्रदात्रीं च पलां वाणीमावाहयाम्यहं। देवीस्तिस्र इति ६ पाद्यादिभिः संपूज्य प्रार्थयेत्। श्रियादिघृतमातृभ्यो न
मो वाग्भ्यः सदा मम कल्याणं तु प्रयच्छंतु श्रियादिघृतमातरः यदंगलेन भो देव्यः पूजिता विधिमार्गतः। कुर्वंतु कार्यमखिलं
निर्विघ्नेन क्रतूद्भवम् आयुष्यमंत्रजपः यदायुष्यं चिरं देवाः सप्तकल्पांतजीविषु ददुस्तेनायुषा सम्यक्जीवेम शर
दः शतं ४ दीर्घनागनगाधो - नंतः सप्तार्णवादिशः अनंतेनायुषा तेन जीवेम शरदः शतम् ५ सत्यानि पंचभूतानि विनाशरहितानि



नि च अविनाश्यायुषा तद्वज्जीवेम शरदः शतम् आयुष्यमिति तृचस्य दक्षाऋषयः उष्णिक् शक्वरी त्रिष्टुप् छन्दांसि प्राजापत्या देव
ता स्यादीर्घायुः कामो स्यायुष्यमंत्रजपे विनियोगः। अग्न्युन्यामादिऋषयो वसिष्ठप्रमुखास्तथा। मार्कंडेयप्रभृतयः सर्वे संतु शिवार्चे
काः १ जमदग्निः कश्यपश्च दीर्घमायुः करोतु मे। अन्ये मूआयुं षुषिगणदेवाइन्द्राद्याश्च सशक्तिकाः २ भृगुरामस्तु तपोनिष्ठाः सत्यव्रत
परायणाः। दीर्घमायुः प्रयच्छन्तु सर्वकामस्य सिद्धये ३ ततो नान्दीश्राद्धम् आयुष्याणि च शान्त्यर्थं जप्त्वा तत्र समाहितः षड्भ्यः पितृ
भ्यस्तदनु भक्त्या श्राद्धमुपक्रमेत्। स्वेन भर्त्रा समं भुंक्ते माता श्राद्धं सुधासमम्। पितामही च स्वेनैव स्वेनैव प्रपितामही। इति कर्मप्रदीपे वह्
हस्पति वचनात् २ स्वयं कर्तुमशक्तस्तदाचार्यद्वारैव कार्यम्॥ प्रतिष्ठाया अंगभूतं श्राद्धमेतत्सुदुर्लभम्। यजमानायात्मनः शक्त्या
करिष्ये मातृपूजनं। यथा सर्वं सव्येनैव देवतीर्थेन यवैश्चापि त्रेपि। मात्रादित्रय पित्रादित्रय मातामहादित्रयसवंधिं नांदीमुख
सत्यवसुसंज्ञक विश्वदेवस्थाने भवद्भ्यां क्षणः कर्तव्यः प्रभुतौ भवन्तौ प्राप्नुवावो इति द्वौ विप्रौ कुशचटौ वा देवे निधाय॥ मा
तृपितामही प्रपितामही नाममुकदेवीनां दासीनां नांदीमुखीनां स्थाने द्वौ विप्रौ कुशचटौ भवद्भ्यां क्षणः कर्तव्यः॥ पितृपिता
महप्रपितामहानां नांदीमुखानां स्थाने द्वौ विप्रौ कुशचटौ भवद्भ्यां क्षणः कर्तव्यः। मातामहप्रमातामहवृद्धप्रमातामहानां
नांदीमुखानां सपत्नीकानां स्थाने द्वौ विप्रौ कुशचटौ भवद्भ्यां क्षणः कर्तव्यः। इदं क्षणदानं नामगोत्रे उच्चारणं सपिंडे ज्ञान।

वा·प्र· व्यांसांकल्पिकेतुनामगोत्ररहितंकार्यं। सांकल्पिकेतु। सत्यवसुसंज्ञका विश्वेदेवा नांदीमुखाः इदं वः पाद्यं। सपिंडार्घप्रदाने स
१९ त्यवसुसंज्ञका विश्वेदेवा नांदीमुखा एष वोर्घः। मातृपितामही प्रपितामह्यो नांदीमुख्य इदं वः पद्यं। सपिंडे मातृपितामही प्रपि
तामह्यो नांदीमुख्य एष वोर्घः। पितृपितामह प्रपितामहा नांदीमुखा इदं वः पाद्यं सपिंडे। पितामह प्रपितामहा नांदीमुखा एष
वोर्घः। मातामह प्रमातामह वृद्धप्रमातामहाः सपत्निका नान्दीमुखाः इदं वः पाद्यं सत्यवसुसंज्ञका विश्वेदेवा नान्दीमुखा इदमासन
मास्यतां नमः मातृपितामही प्रपितामह्यो नांदीमुख्य इदमासनमास्यतां। पितृपितामह प्रपितामहा नांदीमुखा इदमासनमास्य
तां मातामह प्रमातामह वृद्धप्रमातामहाः सपत्निका नांदीमुखा इदमासनमास्यतां। अथ गंधादिदानं। सत्यवसुसंज्ञका विश्वे
देवा नान्दीमुखा एष वो नमः॥ इदं नैवेद्यं वो नमः॥ इदमाचमनीयं वो नमः॥ इदं तांबूलं वो नमः। इदं दक्षिणाद्रव्यं वो नमः। ए
वमेव मात्रादौ पित्रादौ। मातामहादौ संबोधनांतं गंधदानं कार्यम्। सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नांदीमुखेभ्य इमे
गंधाद्याः सर्वे उपचाराः संपूर्णा भवंतु। सपिंडे। ततो ईं चन्द्रमण्डलमभ्युक्षणं वा कृत्वा पात्रेष्वन्नानि द्विगुणानि समानि वा
दत्वा प्रोक्ष्य पात्रमालभ्य यवान्विकीर्य गुष्ठं दत्वा संकल्पं कुर्यात्॥ सत्यवसुसंज्ञका विश्वेदेवा नांदीमुखा इदं वो यु राम·
ग्मब्राह्मणभोजनपर्याप्तं द्विगुणमाममसोपस्करं॥ आमान्नद्विगुणमूल्यभूतं यथाशक्ति हेम वा संप्रददे स्वाहा नमः। एवं मा १९

तृपितामही प्रपितामह्यो नान्दीमुख्य इदं वो युग्मब्राह्मणभोजनपर्याप्तं द्विगुणमामं सोपस्करं वा आमान्नद्विगुणमूल्यभूतं
यथाशक्ति हेम वा संप्रददे स्वाहा नमः। जनपर्याप्तं द्विगुणमामं सोपस्करं वो आमन्नद्विगुणमूल्यभूतं यथाशक्ति हेम वा संप्रददे
स्वाहा नमः। एवं पितामह प्रपितामहा नान्दीमुखा इदं वो युग्मब्राह्मणभोजनपर्याप्तं द्विगुणमाममसोपस्करं वा आमान्नमूल्य
भूतं यथाशक्ति हेम वा संप्रददे स्वाहा नमः एवं मातामह प्रमातामह वृद्धप्रमातामहाः सपत्नीका नान्दीमुखा इदं वो युग्म
ब्राह्मणभोजनपर्याप्तं द्विगुणमामं सोपस्करं वा आमान्नद्विगुणमूल्यभूतं यथाशक्ति हेम वा संप्रददे स्वाहा नमः। ततः सत्यवसुसंज्ञ
का विश्वेदेवा नांदीमुखाः प्रीयंतां। मातृपितामही प्रपितामह्यो नान्दीमुख्यः प्रीयंतां। पितृपितामह प्रपितामहा नांदिमुखाः प्रीयंतां
। मातामह प्रमातामह वृद्धप्रमातामहा नांदीमुखाः सपत्नीकाः प्रीयंतां। अत्र पिंडाः कृताकृताः। पिंडपक्षे वेदीं कृत्वा पूर्वाग्रे
खास्तिस्वः कृत्वा दर्भानास्तीर्य मातर्नांदीमुखि अवनेनिक्ष्वेति जलं दत्वा। एवं पितामही प्रपितामही। एवं पितृपितामह
ह प्रपितामह नांदीमुखेत्यादि। एवं मातामह प्रमातामह वृद्धप्रमातामह सपत्नीक नान्दीमुखा अवनेजनं निक्ष्वेत्यादि। ततः स
क्तुना गुडेन वा दधिबदरयवमिश्रान्पिंडान्कृत्वा। एतत्ते मातर्नान्दीमुखि राघेन पिंडः। इदमन्नं वा स्वाहा नमः। इत्येकं पिंडं द
त्वा परं तूष्णीं द्वितीयं। एवमेकैकस्य द्वौ द्वौ वा दत्वा पुनः प्रत्यवनेनिक्ष्वेति प्रत्यवनेजनं प्राग्वद् दत्वाभ्यंजने वासांसि।

वा॰प्र॰ चरत्वा पिंडमाघ्राय पात्रस्थं जलं परिषिंच्य शिवा आपः संत्विग्त्यादि विश्वेभ्यो देवेभ्यो नान्दीमुखेभ्यः कृतैतन्नांदी॰ श्रा
२० द्धकर्मणः सांगतासिद्ध्यर्थं द्राक्षामलकयवरूपां दक्षिणां दत्तां तन्मूलनिःक्रयणीं दक्षिणां तुभ्यमहं संप्रददे स्वाहा न मम ॥
मातृपितामहीप्रपितामहीभ्यः कृतैतन्नांदीश्राद्धकर्मणः सांगतासिद्ध्यर्थं द्राक्षामलकयवरूपां दक्षिणां वा तन्मूलनिःक्रयणीं
दक्षिणां तुभ्यमहं संप्रददे स्वाहा न मम । पितृपितामहप्रपितामहेभ्यो नान्दीमुखेभ्यः कृतैतन्नान्दीश्राद्धकर्मणः सांगता॰
सिद्ध्यर्थं द्राक्षामलकयवरूपां॰ वा तन्मूलनिष्क्रयणीं दक्षिणां तुभ्यमहं संप्रददे स्वाहा न मम । मातामहप्रमातामहवृद्धप्रमा
तामहेभ्यः कृतैतन्नान्दीश्राद्धसांगतासिद्ध्यर्थं द्राक्षामलकयवरूपां॰ वा तन्मूलनिष्क्रयणीं दक्षिणां तुभ्यमहं संप्रददे स्वा
हा न मम । तत आशीर्ग्रहणं । अनेन नांदीश्राद्धेन प्रीणन्तु पितरो मम । श्रद्धा लक्ष्मीः सुपुत्रांश्च मह्यं ददतु ते सदा १ ततो विसर्ज
नं अनेन नांदीश्राद्धेन सत्यवसुसंज्ञका नान्दीमुखदेवताः प्रीयन्तां । माता पितामही चैव तथैव प्रपितामही । पिता पितामहश्चै
व तथैव प्रपितामहः १ मातामहस्तत्पिता च प्रमातामहकादयः । एते भवन्तु मे प्रीताः प्रयच्छन्तु च मंगलमिति संप्रार्थ्य पिं॰
डान्विसृजेत् । इति सपिंडसांकल्पिकनान्दीश्राद्धम् ॥ अथाचार्यादीनां वरणम् । तत्र निर्णयः । त्रिविक्रमादयस्तु आदौ ब्रह्मवरण रा॰म॰
मिच्छन्ति । अनन्तदेवप्रभृतिनागराश्चादावाचार्यवरणमुच्यन्ते । आचार्यवरणोत्तरं सदस्यं हुत्वा ब्रह्मवरणमिति हेमाद्रिः ॥ ८ ॥ २०

ऽअस्माभिः पंचगौडैस्तु देवमतमवलम्ब्यादावाचार्यवरणं क्रियते ॥ देशकालौ स्मृत्वामुकगोत्रोऽमुकप्रवरोऽपेतोऽमुकशाखाध्या
य्यमुकशर्माहं शान्तदान्तलक्षणयुतममुकगोत्रममुकप्रवरमाध्यंदिनीयशाखाध्यायिनममुकशर्माणं ब्राह्मणं अस्मिन्स्वप्र
सादाचलदेवप्रतिष्ठाकर्मणि विहितकर्मकर्तुमेभिर्वरणद्रव्यैराचार्यत्वेन वृणे ऽ इति वृणुयात् । वृतोस्मीत्युक्त्वा स्वमाचाराद्वृते
नरो स्वामिनि मंत्रं जपेत् ऽ ततः प्रार्थयेत् । आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः । तथा त्वं मम यज्ञेस्मिन्नाचार्यो भवद्ध
सुव्रत ऽ मंत्रमूर्तिर्भवान्नाथ संसारोच्छेदकारक ऽ देवः पूजार्हो यथा स्यात्कुरु धर्मोङ्गितं चनः । संसारभयभीतेन चायं यजतः
सुभक्तितः । प्रारब्धस्त्वत्प्रसादेन तु निर्विघ्नो मे भवत्विति ३ एवमेव ब्रह्माणं वृत्वा प्रार्थयेत् । यथा चतुर्मुखो ब्रह्मा सर्ववेदधरः प्र
भुः । तथा त्वं मम यज्ञेस्मिन्ब्रह्मा भव द्विजोत्तम ॥ एवमेव सदस्यं वृत्वा प्रार्थयेत् । त्वन्नो गुरुः पिता माता त्वं प्रभुस्त्वं परायणं ॥
आपद्धिमोक्षणार्थं यसदस्यं त्वामहं वृणे ॥ एवं ग॰णपं वृत्वा प्रार्थयेत् । वांछितार्थफलावाप्त्यै पूजितो यः सुरासुरैः । निर्विघ्न
घ्नकृत संसिध्यै त्वामहं गणपं वृणे एवमेवोपद्रष्टारं वृत्वा प्रार्थयेत् । भगवन्सर्वधर्मज्ञ सर्वधर्मभृतां वर वितते मम यज्ञेस्मिन्नु
पद्रष्टा भव द्विज । एवमेव चत्वारो ऋत्विजो वृत्वा प्रार्थयेत् । वह्निप्रदीप्तशीलांश्च सद्यवनकारकान् । प्रारब्धे मम यज्ञे॰
स्मिन्होतृन्विप्रानहं वृणे । एवं चत्वारो वेदजापकान्वृत्वा प्रार्थयेत् । देवता ध्यानचित्तांश्च देवतास्तुतिकर्तृकान् । उद्गातॄनेम

वा·प्र· मयज्ञेस्मिञ्ज्ञापकान्वृणीष्वहं। एवं चत्वारो द्वौ वा द्वारपालान्वृत्वा प्रार्थयेत्। भूतप्रेतपिशाचाद्या ये दुष्टा ये वै मे माध्वरे रक्षकान्द्वा
२१ रपालांश्च वृणे हन्तु यथासुखम्। एवं सर्वान्वृत्वा यथाशक्ति समग्रीभिर्मधुपर्कैश्चाचार्यादीन्पूजयेत्। स्मार्त्तकर्मणि केचिन्मधु
पर्कं नेच्छन्ति। तदसत्। कुतः पारस्करकृतस्मार्त्तसूत्रे विहितत्वात् षडर्घ्या भवन्तीति। अत्र मधुपर्के मांसो विहितः सूत्रकारेण
न त्वेवामांसोऽर्घः स्यादधियज्ञमधिविवाहं कुरुतेति मांसविधानं कृतं तथापि याज्ञवल्क्येन निषेधः कृतः अस्वर्ग्यं लोकविद्वि
ष्टं धर्ममप्याचरेन्न। इति बृहन्नारदीयपुराणेन गतकलिवर्ज्येषूक्तं देवराच्च सुतोत्पत्तिर्मधुपर्के पशोर्वधः। अथ मधुपर्कपूजा
। ततो यजमानः यथोक्तलक्षणविशिष्टं स्वासनस्य पश्चाद्दवस्थितान्विप्रान्प्रत्युच्यते। साधु भवानास्तामर्चयिष्यामो
भवन्तम्। ततो विप्रा ऊचुः। अर्चयानत्र यथासुखं भवन्तस्तु सन्तु विप्राः समागताः। अतो युष्मान्पूजयामो वयं श्रद्धासमन्विताः। अत्रा
र्चयेति विप्रा ऊचुः॥ ॐ विष्टरो विष्टरो विष्टरः इत्यन्येनोक्ते। विष्टरः प्रतिगृह्यतामिति दाता वदेत्। विष्टरं प्रतिगृह्णामीति विप्राः कथ
यन्तः सन्तो यथोक्तं विष्टरं गृहीत्वासने उदगग्रं निधाय। वर्ष्मोऽसीति मन्त्रस्याथर्वण ऋ० अनु० विष्टरो देव० विष्टरोपवेशने विनि०। इत्य
नेनाभ्युपविशन्ति। तत्रः ब्रह्मरोमसमुत्पन्नाः कुशाः प्रादेशमात्रकाः। तैर्युक्तं विष्टरं रक्ष्यं तु प्रतिगृह्णन्तु भो द्विजाः। स्वासनाधो ह्युत्तराग्रं एम·
स्थापयेत्। ततः पाद्यमिति वारत्रयमन्येनोक्ते। पाद्यं प्रतिगृह्यतामित्यर्चको वदेत्। पाद्यं प्रतिगृह्णामीति विप्रो वदेत्। उभाभ्यां हस्ताभ्यां २१

प्रतिगृह्य। विराजो दोहोसीत्यस्य प्रजापतिरृषिर्यजुश्छन्द आपो देवताः पादप्रक्षालने विनियोगः। स्वागतं भो द्विजश्रेष्ठ मदनुग्र
हकारकाः। इदं शुद्धजलं पाद्यं भवद्भिः प्रतिगृह्यताम्। अनेन दक्षिणं पादं प्रक्षाल्य वामं प्रक्षालयति। ततो विष्टरो वारत्रयमित्यन्येनो
क्ते। पूर्वोक्तप्रकारेण दानग्रहणान्तेनैव मन्त्रेण धारणं च। तत्र सज्जानीनां वरिष्ठोस्मि तारकाणां रवेरिव। मदुपस्तीर्णनामिष्ठो रूपर्युपवि
शाम्यहं। इति पादनिक्षेपस्थाने द्वितीयविष्टरमुत्तराग्रं निधापयेत्। ततोऽर्घोऽर्घोऽर्घ इत्यन्येनोक्ते। अर्घः प्रतिगृह्यतामिति दात्रोक्ते अर्घं प्रति
गृह्णामीत्यभिधाय। आपस्थ इत्यस्य प्राजापत्य ऋ० यजु० आपो दे० अर्घग्रहणे विनियोगः। तमर्घं मूर्द्धाभिवंद्य। समुद्रं वः इत्यस्याथ
र्वण ऋ० अनु० आपो दे० अभिमन्त्रणे विनि०। तत्र। आपो यूयं सदा पूता भवथ ह्यग्निहेतवः। तेन सर्वानभीष्टार्थांल्लभेयं प्रतिगृह्य च। इत्यु
क्त्वाञ्जलिना प्रतिगृह्य शिरः प्रसुवाम्यवस्य मा णा मंत्रेणाभिमंत्र यन्नात्मसंमुखं निनयेयुः। साधितार्थो हि वः पूतागमयामिनदीपतिम्॥
अतो व्रजत स्वस्थानं लक्ष्मीकृत भवन्तु वै अस्मत्सन्तानपुरुषा उपघातेन वर्जिताः। मदर्थे मंगलजलं क्षरितं मास्तु सर्वदा। इत्यर्घं
निनयेयुः। ततोऽन्यप्याचमनीयमिति त्रिरुच्चार्यते। अचमनीयं प्रतिगृह्यतामित्यर्चको वदेत्। आचमनीयं प्रतिगृह्णामीत्युक्त्वाचमनी
यं गृहीत्वा आमागन्नित्यस्य परमेष्ठी ऋ० बृहती छं० आपो दे० आचमने विनियोगः। सकृन्मन्त्रेण द्विस्तूष्णीमाचमनं कुर्यात्। तत्र संव
र्द्धं कुरु सत्येन संयोजय सुतेजसा। लोकानां मां प्रियं गोभ्यादीनां चाधिपतिं कुरु। एवंभूता हि मामापः शरीरामहिं सकाः सुशुद्धाभिस्ताभि

रश्मिराचम्यन्तु द्विजातयः इति सकृदाचम्य पुनः स्नानीचमनेकुर्युः। ततोन्योमधुपर्क इति वारत्रयमुच्चार्यते। मधुपर्कं प्रतिगृह्यता
मितिदाता वदेत्। मधुपर्कं प्रतिगृह्णामीत्यभिधाय। ॥ ॥

—— दातृहस्तस्थमधुपर्कं किंचिदुद्घाट्यावियोनिरीक्षेत। मित्रस्यत्वेति बृहस्पतिऋ· यजुः· मधुपर्को देवता मधुपर्कावेक्षणे विनि
योगः। तत्र दृष्ट्या सूर्यस्य पश्यामि मधुपर्कं समुद्द्ये। इति च मधुपर्कं प्रतीक्ष्य। देवस्य त्वेति प्रजा· गाय· सविता दे· मधुपर्कग्रहणे वि· त
त्र। दानादिगुणयुक्तस्याभ्यनुज्ञायां रवेरहं। गृह्णाम्यमृतपाणिभ्यां देवयोर्मेश्विकुमारयोः। इत्यनेन मधुपर्कग्रहणं। ततः सव्यकरे कृ
त्वा दक्षिणहस्तानामिकया त्रिरालोड्य निरस्यति। नमः श्यावास्येत्यस्य प्रजापतिऋ· यजुः सविता दे· मधुपर्कालोचने विनि· तत्रालो
डनमंत्रः नमः कपिशवक्त्राय मधुपर्कं निरीक्षिते। यं दिक्षिष्टं परमस्यंतन्निरस्यामि बहिर्भुवि। इति त्रिरालोड्य निरस्यति। प्रत्यालो
डनेनानामिकांगुष्ठाभ्यां तूष्णीं भूमौ निरसनं। ततो मधुपर्कपात्रं भूमौ निधाय। यन्मधुन इत्यस्य कुत्सऋ· जगती छं· मधुपर्को दे· मधुप
र्कप्राशने वि·। मकरंदस्य माध्वीकमुत्कृष्टममृतं तु यत्। तद्धि शिष्टरसेनेतत् तृणाधिकतरं शुचि। रूपवान्मधुपर्को हि ततोऽश्नामि तमह
म्भवे ॥ इत्यनेन प्रतिप्राशने चैतन्मंत्रपाठः। ततः सर्वप्राशयेद्वा प्रागसंचरेनिनयेत्। पुत्राय वा प्रियाय दद्यात्। ततः स्नानेदि
राचमनम्। ततः प्राणादीन्संमृशेत्। तज्जलयुक्तेन कर्तव्यमिति हरिहरः। केवलेन वा गदाधरः। युक्तं चैतत्। तन्नं वमइति गात्राणि स·

ष्टं स्पृशन्त इति श्रोत्रसूत्रदर्शनात्। तद्यथा। वागिन्द्रियमस्मुखेऽस्तु। इति पंचाङ्गुल्यग्रैर्मुखं स्पृशेत्। मन्नासिकयोः प्राणेन्द्रियम
स्तु। इति तर्जन्यंगुष्ठाभ्यां नासिके युगपत्स्पृशेत्। मन्नेत्रयोश्चक्षुरिन्द्रियमस्तु। इत्यनामिकांगुष्ठाभ्यां युगपच्चक्षुषी स्पृशेत्। म·
च्छ्रवणयोः श्रोत्रेन्द्रियमस्तु। इति सव्यकरेण सव्येकर्णौ स्पृशेत्। मद्दोर्द्वयोर्बलेन्द्रियमस्तु। इत्यनेन द्वौ बाहू स्पृशेत्। मदूर्वोस्तेजोस्तु। इ
त्यनेन युगपदूर्वोर्हस्ताभ्याम् मद्देहो देहस्यांगानि वाचा तु पहता नि युगपत्सन्तु। इति करद्वयेन सर्वांगानीति हरिहरः। दक्षिणेनेति
गदाधरः। इति तुरीयजातिप्राणसंमर्शनम्। स्मार्तपक्षे। वाङ्म आस्येस्तु नसोर्मे प्राणोस्तु। अक्ष्णोर्मे चक्षुरस्तु। युगपत्कर्णयोर्मे श्रोत्रमस्तु
। बाह्वोर्मे बलमस्तु। ऊर्वोर्मे ओजोस्तु। अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु। अत्र प्रणवन्यासः कार्यः। तत आचम्य। ततो यजमानः गौर्गौ
र्गौः इत्युच्चैस्त्रिराह॥ ब्राह्मणः। माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः। प्रनुवोचं चिकितुषे जनाय मा
गामनागामदितिं वधिष्ट। मम अमुकशर्मणो यजमानस्योभयोः पाप्मा हतः। इति तृणं छिंद्यात्। तत्रागावोगावोगावः॥ इति यजमा
नः। ततो विप्राः। रुद्राणां जननी प्रोक्ता वसूनां चापि कन्यका। आदित्यभगिनी चेयं तथा पयसस्त्वाश्रयः। ब्रवीमि चेतनवते
तुभ्यं धेनुमिमां शुभां। अखंडनीयां मां नो धृं यूयं मा घ्नत मा घ्नत। अमुकनाम्नो यजमानस्य च पापसमुदायो हतः। ब्रह्मरूपेणयात
तृणानि भक्षय। इति गवामुत्सर्गः। इति मधुपर्कः। ततो ब्राह्मणपूजनं। आदौ वस्त्रपरिधानं। परिधास्यै इत्यस्य आलेवायनऋ· पंक्ति

वासोदे॰ वस्त्रपरिधाने वि॰। नत्र। सर्वभूषाधिकं दिव्यं लोकलज्जानिवारणं। मयोपपादितं वस्त्रं परिधानाय गृह्यतां। इति वासः। यज
मानदत्तं यज्ञोपवीतं दशगायत्र्याद्भिः प्रोक्षितं। यज्ञोपवीतमित्यस्य परमेष्ठी ऋ॰ त्रिष्टु॰ लिंगोक्ता दे॰ उपवीत धारणे वि॰। भूमि
देवानमस्तुभ्यं पान्तु मां भवसागरात्। ब्रह्मसूत्रं मंत्रपूतं गृह्यतां धारणाय वः। इत्युपवीतम्। अथोत्तरीयं। यशसामेत्यस्याथर्वण ऋ॰
पंक्तिश्छं॰ लिंगोक्ता दे॰ उत्तरीयवस्त्रपरिधाने वि॰ नत्र। तन्तुसन्तानसंनद्धं निर्मलं सद्दसंवरं। उत्तरीयं प्रगृह्णन्तु तपोनिष्ठा द्विजोत्तमाः। इत्युत्त
रीयम्। उभयत्र द्विराचमनं चन्दनमङ्गुलिप्यपश्वाज्जपेत्। सुचक्षा अहमित्यस्य प्रजा॰ यजु आशीर्दे॰ जपे वि॰ नत्र। मलयाचलसंभू
तं कुंकुमागरुवासितं विलेपनाय भूदेवा गृह्यन्तां चन्दनं शुभं। इति गंधं ततः पुष्पमालाग्रहणं। याम्आहरदित्यस्य भरद्वाज ऋ॰ अनु॰ सु
मनसो दे॰ पुष्पग्रहणे वि॰। यूथिकापाटलयुतां स्रजं सुरभिसंयुतं यजमानकराद्यूयं गृह्णीध्वं प्रयताव यम्। इति पुष्पमालाग्रह
णं। ततो धारणं। यद्यशइत्यस्य विश्वामित्र ऋ॰ त्रिष्टु॰ सुमनो दे॰ पुष्पधारणे विनियोगः। सुगंधपुष्परचितां मालां सूत्रविनिर्मितां। अलं
काराय भूदेवाः प्रयच्छाम्यंगभूषणम्। इति पुष्पमालाम्। अथालंकरणं। अलंकरणमित्यस्य भरद्वाज ऋ॰ उष्णि॰ अलंकरणं देवतं
अलंकरणधारणे वि॰। क्षीरोदमथने पूर्वमुद्भूतं कुंडलद्वयं। श्रिया सह समुद्भूतं ददेऽश्रीप्रीयतामिति। अनेनैव दक्षिणवामकुंडल
धारणं सुवर्णघटितं दिव्यं नानारत्नविभूषितं। ब्राह्मणेभ्यः प्रयच्छामि सुंदरं कंठभूषणं। इति कंठभूषणं हिरण्यनिर्मितं दिव्यं केयूर



द्वयभूषितं। बाहुसंधारणार्थाय युष्मभ्यं प्रददाम्यहं॥ इति केयूरद्वयं। कांचनं हस्तवलयं रूपकांतिसुखप्रदं विभूषणं प्रदास्यामि
विभूषयन्तु मां सदा। इति वलयम्। हिरण्यगर्भसंभूतं सौवर्णं चांगुलीयकं। रत्नादिखचितं रम्यं विप्राय प्रददे वरं। इत्यंगुलीयकं। सु
वर्णतन्तुघटितं ब्रह्मग्रंथिसमन्वितं। उपवीतं प्रदास्यामि प्रीयतां सुद्विजोत्तमः। इति सुवर्णोपवीतम्। धूरसीति धूपः। वनस्पति
रसोद्भूतो गंधाढ्यः सुमनोहरः। धूपोऽयं वह्निसंभूतो भवतां घ्राणतर्पणः। अग्निर्ज्योतिरिति दीपः। चक्षुर्दं सर्वलोकानां तिमि
रस्य निवारणं। आर्तिक्यं कल्पितं भक्त्या प्रयच्छामि सुखाय वः। दीपः। पयो दुग्धं सुसंमिश्रं सिता खंडैः समन्वितं भवतां भूतिहेतु
त्वं नैवेद्यं गृह्यतां द्विजाः। स्वादिष्टयेति। ततो विराडित्याचमनं मंदाकिन्यादिसंभूतं सुगंधं निर्मलं जलं। गृह्यतां चसुरश्रेष्ठा दिव्य
माचमनीयकम्। याः फलिनीरिति तांबूलपूगीफलं नागवल्लीदलैर्युक्तं पूगीफलसमन्वितं मुखस्याभरणं श्रेष्ठं तांबूलं प्रतिगृ
ह्यताम्। हिरण्यगर्भः समिति दक्षिणां सुवर्णमग्निदैवत्यं रजतं चन्द्रदैवतं। ताम्रं मार्तण्डदैवत्यं दक्षिणां प्रददामि वः। दक्षि
णां। ताम्रं वा रजतं वैत्यं सुगंधजलपूरितं उपपात्रेण संयुक्तं जलपात्रं ददाम्यहम्। इति पात्रं। एभिरुपचारैः संपूज्य प्रार्थ
येत्। ब्राह्मणाः सन्तु शास्तारः पापात्पान्तु समाहिताः। वेदानां चैव वक्तारः पातारः सर्वदेहिनां॥ जपयज्ञैस्तथा होमै
र्दानैश्च विविधैः शुभैः। देवानां च पितॄणां च तृप्त्यर्थं याजकाः स्मृताः। येषां देहस्थिता वेदाः पावयंति जगत्त्रयं। रक्षन्तु सततं ते

वा॰प्र॰ मां जपयज्ञे व्यवस्थिताः। ब्राह्मणा जंगमं तीर्थं त्रिषु लोकेषु विश्रुतं। येषां वाक्योदकेनैव शुध्यंति मलिना जनाः। पावनाः सर्ववर्णा
२४ नां ब्राह्मणा ब्रह्मरूपिणः। सर्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः। श्रोत्रियाः सत्यवाचश्च देवध्यानरताः सदा। यद्वाक्यामृत
संसिक्ता ऋद्धिं यांति नरद्रुमाः। अंगीकुर्वंतु कर्मैतत्कल्पद्रुमसमाशिषः। यथोक्तनियमैर्युक्ता मंत्रार्थे स्थिरबुद्धयः। यत्कृपालोचना
त्सर्वा ऋद्धयो वृद्धिमाप्नुयुः। मम यज्ञे जपे पूज्याः संतु मे नियमान्विताः। अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः। देवध्यानरता
नित्यं प्रसन्नमनसः सदा। अदुष्टभाषिणः संतु मा संतु परनिंदकाः। ममापि नियमा ह्येते भवंतु भवतामपि। अस्य यागस्य निष्पत्तौ
भवंतोऽभ्यर्थिता मया। सुप्रसन्नैश्च कर्तव्यं कर्मेदं विधिपूर्वकम्। सर्वे ब्राह्मणा ब्रूयुः। यथाविहितानि कर्माणि वयं करवामः। इ
ति प्रार्थना। ततो यजमानायाशीः पूर्वकं तिलककरणं रक्षाबंधनं च। तद्यथा। लक्ष्मीर्नारायणो देवो सावित्री कमलासनो। पार्वतीशंक
रौ देवो मंगलं तिलकं ददुः। इति तिलकः। येन बद्धो बली राजा दानवेंद्रो महाबलः। तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल। इति रक्षा
सूत्रबंधनम्। करोतु स्वस्ति ते ब्रह्मा स्वस्ति चापि द्विजातयः। सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्वस्ति सर्वदा। ययातिर्नहुषश्चैव धुंधुमा
रो भगीरथः। तुभ्यं राजर्षयः सर्वे स्वस्ति कुर्वंतु नित्यशः। स्वस्ति तेऽस्तु द्विपादेभ्यश्चतुष्पादेभ्य एव च। स्वस्त्यस्त्वपदकेभ्यश्च नित्यं नव राम॰
महाभवेद्ग्रहसनैभिराशीर्वादः। ततआचार्यः अग्न्यायतनात्पश्चिमतउपविश्य आचम्य प्राणानायम्य पवित्रपाणिर्देशकालौ सं २४

की र्त्य प्रारीप्सितकर्मणि यजमानवृतोऽहमाचार्यकर्म करिष्यामि इति संकल्प्य हस्ते सर्षपान्गृहीत्वा भूतोत्सारणं कुर्यात् यदत्र सं
स्थितं भूतं स्थानमाश्रित्य सर्वतः स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु अपसर्पंतु ये भूता ये भूता भूमिसंस्थिताः ये भूता विघ्नकर्तार
स्ते नश्यंतु शिवाज्ञया अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशं सर्वेषामविरोधेन ब्रह्मकर्म समारभे भूतप्रेतपिशाचाद्या अपक्रामंतु रा
क्षसाः स्थानादस्माद्व्रजंत्वन्यत्स्वीकरोतु भुवं त्विमां पूर्वे नारायणः पातु वारिजाक्षस्तु दक्षिणे प्रद्युम्नः पश्चिमायां तु वासुदेवस्तथोत्तरे
ऊर्ध्वं गोवर्द्धनो रक्षेदधस्ताच्च त्रिविक्रमः इति सर्षपान्विकीर्य पंचगव्यकरणं गवा मंगसमुद्भूतं गंगादिसलिलाश्रयं गोमूत्रं
परमं शुद्धं सर्वशुद्धिकरं महत् इति गोमूत्रं अग्रमग्रं चरंतीनामोषधीनां रसं वने तासामृषभपत्नीनां पवित्रं कायशोधनं इति गो
मयं अलक्ष्मीहरणं नित्यं सौभाग्यस्य विवर्द्धनं क्षीरं मंगलमायुष्यमतः शांतिं प्रयच्छ मे इति पयः धेनुदुग्धसमुद्भूतं दु धं सर्वजन
प्रियं दधि मंगलमायुष्यमतः शांतिं प्रयच्छ मे इति दधि यालक्ष्मीर्यच्च मे दौस्थ्यं सर्वगात्रेषु च स्थितं तत्सर्वं शमयत्वाज्यं लक्ष्मीपुष्टि
श्च वर्द्धतु इत्याज्यं विरंचिना सहोत्पन्न परमेष्ठिनिसर्गज नुद सर्वाणि पापानि दर्भ स्वस्तिकरो भव इति कुशोदकं वद्ध्वा लोड्य
त्र्यमभिमन्त्र्य अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः इति यागभूमिं संप्रोक्ष्य
ततः देवा आयांतु यातुधाना अपयांतु विष्णो देवयजनं रक्षस्व इति भूमौ प्रादेशं कुर्यात् ततोऽग्न्यायतनादीशान्यामुदक्संस्थां

गृहवेदीं च कुर्यात् तत्र गृहवेदी हस्तमात्रा सम चतुरस्रा हस्तोच्छ्रिता त्रिवप्रा वा चतुरंगुलोच्चा वास्तुवेदी तु द्विवप्रा हस्तवि
स्तृता द्वादशांगुलोच्चा प्रथमो वप्रो द्व्यंगुलोच्चः द्वितीयस्त्र्यंगुलः वप्रो परि सप्तांगुलोच्चा वा चतुरंगुलोच्चा वरप्र हिता। श्रीगणेशा
य नमः। अथ वास्तुमंडलदेवतास्थापनप्रयोगः तत्र मात्स्ये गृहे प्रासादादौ च शिख्यादिक्रम एव विहितस्तेनात्रत्र तेन प्रयोगो लि
ख्यते मासपक्षाद्युल्लिख्य अमुकवास्तुप्रतिष्ठाकर्मणि वास्तुमंडलदेवतानां स्थापनं पूजनं च करिष्ये इति संकल्प्य वेद्याः।
कोणचतुष्टये ईशानादिप्रादक्षिण्येन शंकून् रोपयेत् तत्र मंत्रः विशंतु भूतले नागा लोकपालाश्च सर्वतः अस्मिन् गृहे वतिष्ठंतु॥
आयुर्बलकराः सदा इति प्रतिरोपणे मंत्रावृत्तिः प्रासादे तु प्रासादे चाव तिष्ठंतु इति तत आग्नेयादिक्रमेण रोपणक्रमेण चाशं
कुपार्श्वे माषभक्तबलीन् दद्यात् तत्र मन्त्रः अग्निभ्योऽप्यथ सर्पेभ्यो ये चान्ये तत्समाश्रिताः तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमु
त्तमं १ नैर्ऋत्याधिपतिश्चैव नैर्ऋत्यां ये च राक्षसाः बलिं तेभ्यः प्रयच्छामि सर्वे गृह्णंतु मं त्रितैः २ नमोऽस्तु वायुरक्षेभ्यो ये चान्ये तत्स
माश्रिताः बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमं ३ रुद्रेभ्यश्चैव सर्पेभ्यो ये चान्ये तत्समाश्रिताः बलिं तेभ्यः प्रयच्छामि गृह्णंतु सत
तोत्सुकाः ४ इति बलिं दत्वा गृहवास्तुषु सुवर्णादिशलाकया प्रागायता उदक्संस्था दश रेखाः कुर्यात् तत्र रेखानामानि शांतायै न रा॰म॰
मः १ यशोवत्यै नमः २ कांतायै॰ ३ विशालायै॰ ४ प्राणवाहिन्यै॰ ५ सत्यै॰ सुमत्यै॰ ७ नंदायै॰ ८ सुभद्रायै॰ ९ सुरथायै॰ १० तत उदगाय २५

ताः प्राक्संस्था दश रेखाः कुर्यात् हिरण्यायै॰ १ सुव्रतायै॰ २ लक्ष्म्यै॰ ३ विभूत्यै॰ ४ विमलायै॰ ५ प्रियायै॰ ६ जयायै॰ ७ ज्वालायै॰ ८ विशोका
यै॰ ९ इडायै॰ १० इति गृहवास्तुमंडपादौ तु नव नवेधान्यायै॰ प्राणायै॰ २ विशालायै ३ स्थिरायै॰ ४ भद्रायै॰ ५ ज्वालायै॰ ६ निशायै॰
७ विरजायै॰ ८ विभवायै॰ ९ इत्युदगायताः प्राक्संस्थाः लक्ष्म्यै॰ १ यशोवत्यै॰ २ कांतायै॰ ३ सुप्रियायै॰ ४ विमलायै॰ ५ शिवायै॰ ६ सु
भगायै॰ ७ सुमत्यै॰ ८ इडायै॰ इति प्रागायता उदक्संस्थाः प्रासादे तु श्रियायै॰ १ यशोवत्यै॰ कांतायै॰ ३ सुप्रियायै॰ ४ परायै॰ ५ शि
वायै॰ ६ सुशोभायै॰ ७ सधनायै॰ ८ इभायै॰ इति प्रागायता उदक्संस्थान वा धर्मायै॰ १ धरायै॰ २ विशालायै॰ विशोकायै॰ ३ स्थि
रायै॰ ४ रूपायै॰ ५ गदायै॰ ६ निशायै॰ ७ विभावायै॰ ८ प्रभवायै॰ ९ इत्युदगायताः प्राक्संस्था नव॥ इति प्रासादे ततः पंचोपचा
रैः संपूज्य रेखादेवताभ्यो नमः इति द्वादश रेखाभिर्नवकैरेकाशीतिकोष्ठात्मकं गृहवास्तुमंडलं संपद्यते नवरेखाभिरष्टाष्टकेश्चतुः
षष्टिकोष्ठात्मप्रासादवास्तुमंडलं मंडपवास्तुमंडलं च संपद्यते ततः कुंडे स्थंडिले वा अग्निस्थापनं मासपक्षाद्युल्लिख्य अ
स्मिन् वास्तुप्रतिष्ठाकर्मणि पंचसंस्कारपूर्वकमग्निस्थापनं करिष्ये दर्भैः परिसमुह्य गोमयेनोपलिप्य स्रुवेणोल्लिख्य अनामिकां
गुष्ठाभ्यामुद्धृत्य उदकेनाभ्युक्ष्य कांस्यपात्रेणाग्निमादाय कुंडाग्निकोणे निधाय क्रव्यादांशं त्यक्त्वा कुंडमध्ये आनीय शोभननामानमग्नि
मुपसमादधे इति स्वाभिमुखमग्निमुपसमाधाय चतुःशृंगस्त्रिपाद् द्विशीर्षः सप्तजिह्वकः सप्तहस्तस्त्रिधाबद्धो महान्दे

वः प्रतिष्ठितः शोभननामायं सुप्रतिष्ठितो भव इत्यग्निं प्रतिष्ठाप्य ध्यायेत् तद्यथा रुद्रतेजः समुद्भूतं द्विमूर्द्धानं द्विनासिकं षण्नेत्रं
च चतुःश्रोत्रं त्रिपादं सप्तहस्तकं याम्यभागे चतुर्हस्तं सव्यभागे त्रिहस्तकं स्रुवं स्रुचं च शक्तिं च अक्षमालां च दक्षिणे तोमरं व्यजनं चै
व घृतपात्रं तु वामके विभृतं सप्तभिर्हस्तैर्द्विमुखं सप्तजिह्वकं दक्षिणं च चतुर्जिह्वं त्रिजिह्वं चोत्तरं मुखं। द्वादशकोटिमूर्त्या ख्यं द्विपं
चाशत्कलायुतं स्वाहास्वधावषट्कारैरंकितं मेषवाहनं रक्तमाल्याम्बरधरं रक्तपद्मासनस्थितं शोभनं शुभनामानं वन्हिमा॰ वाहयाम्यहं
त्वं मुखं सर्वदेवानां सप्तार्चिरमितद्युते आगच्छ भगवन्देव यज्ञेऽस्मिन्संनिधो भव इति ध्यात्वा कुंडे मेखलाः पूजयेत् तद्यथा
श्वेतवर्णालंकृतायां विष्णुं। पद्मनाभं हृषीकेशं कंसचाणूरमर्दनं आगच्छ भगवन्विष्णो मेखलायां स्थितो भव विष्णो इहाग
च्छ इह तिष्ठ विष्णवे नमः विष्णुमावाहयामि रक्तवर्णालंकृतायां ब्रह्माणं विश्वरूप निराधार निरालंब निरामय पितामह समा
गच्छ मेखलायां स्थितो भव ब्रह्मन्निहागच्छेह तिष्ठ ब्रह्मणे नमः ब्रह्माणमावाहयामि कृष्णवर्णालंकृतायां रुद्रं गंगा
धर महादेव पार्वतीप्राणवल्लभ आगच्छ भव नो शं मेखलायां स्थितो भव रुद्रेहागच्छेह तिष्ठ रुद्राय नमः रुद्रमावाहयामि यो
न्यां गौरी हिमाद्रितनये गौरि शंकरप्राणवल्लभे आगच्छ देवि देवेशि योन्यामत्र स्थिता भव गौरी हागच्छेह तिष्ठ गौर्यै नमः गौरीमावा राम॰
हयामि ततः आवाहितविष्ण्वादिदेवताः सुप्रतिष्ठिता भवन्तु इति प्रतिष्ठाप्य आवाहितविष्ण्वादिदेवताभ्यो नमः इति पंचो २६

पचारैः पूजयेत् ततः पूर्वनिर्मितग्रहवेद्यां श्वेतवस्त्रं प्रसार्य तत्र नवकोष्ठानि सकर्णिकमष्टदलं कमलं वा विलिख्य मध्यादिको
ष्ठेषु कर्णिकाद्यष्टपत्रेषु वा उक्तदिक्षु सूर्यादिग्रहस्थापनं तद्यथा देशकालौ संकीर्त्य प्रारीप्सितकर्मसाद्गुण्यार्थं ग्रहपीठदे
व॰ तानां स्थापनं पूजनं च करिष्यामि। इति संकल्पः। मध्यकोष्ठमध्ये कर्णिकायां वा प्राङ्मुखं सूर्यं रक्तगंधाक्षतपुष्पैः कलिंगदेशो
द्भव काश्यपगोत्र सूर्यं इहागच्छेह तिष्ठ सूर्याय नमः जपाकुसुमसंकाशं काश्यपेयं महाद्युतिं तमोऽरिं सर्वपापघ्नं सूर्यमावाहयाम्यहं
आग्नेयकोष्ठमध्ये पत्रे वा प्रत्यङ्मुखं सोमं श्वेतगंधाक्षतपुष्पैः यमुनातीरोद्भव आत्रेयसगोत्र सोमेहागच्छेह तिष्ठ सोमाय नमः
दधिशंखतुषाराभं क्षीरोदार्णवसंनिभं ज्योत्स्नापतिं निशानाथं सोममावाहयाम्यहं ततः दक्षिणकोष्ठमध्ये पत्रे वा दक्षिणमुखं भौ
मं रक्तगंधाक्षतपुष्पैः अवंतिदेशोद्भव भारद्वाजसगोत्र भौमेहागच्छेह तिष्ठ भौमाय नमः धरणीगर्भसंभूतं विद्युत्तेजः समप्रभं कु
मारं शक्तिहस्तं च भौममावाहयाम्यहं ईशानकोष्ठमध्ये पत्रे वा पीतगंधाक्षतपुष्पैरुदङ्मुखं बुधं मगधदेशोद्भव आत्रेयसगोत्र बु
धेहागच्छेह तिष्ठ बुधाय नमः प्रियंगुकलिकाभासं रूपेणाप्रतिमं विभुं। सौम्यं सौम्यगुणोपेतं बुधमावाहयाम्यहं उत्तरकोष्ठमध्ये प
त्रे वा उदङ्मुखं गुरुं पीतगंधाक्षतपुष्पैः सिंधुदेशोद्भव आंगिरससगोत्र बृहस्पत इहागच्छेह तिष्ठ बृहस्पतये नमः देवानां च मुनी
नां च गुरुं कांचनसंनिभं वंद्यभूतं त्रिलोकानां गुरुमावाहयाम्यहं पूर्वकोष्ठमध्ये पत्रे वा प्राङ्मुखं शुक्रं श्वेतगंधाक्षतपुष्पैः

ला·प्र भोजकटदेशोद्भव भार्गवसगोत्र शुक्र इहागच्छ इह तिष्ठ शुक्राय नमः हिमकुंदमृणालाभं दैत्यानां परमं गुरुं सर्वशास्त्रप्रवक्तारं शुक्रमा
२७ वाहयाम्यहं पश्चिमकोष्ठमध्ये पत्रे वा प्रत्यङ्मुखं शनिं नीलगंधाक्षतपुष्पैः सौराष्ट्रदेशोद्भव काश्यपसगोत्र शनैश्चर इहागच्छ इह ति
ष्ठ शनैश्चराय नमः नीलांबुजसमाभासं रविपुत्रं यमाग्रजं छायामार्तंडसंभूतं शनिमावाहयाम्यहं नैर्ऋत्यकोष्ठमध्ये पत्रे वा द
क्षिणमुखं राहुं कृष्णगंधाक्षतपुष्पैः राठीनपुरोद्भव पैठिनसगोत्र राहो इहागच्छ इह तिष्ठ राहवे नमः अर्द्धकायं महावीर्यं चंद्रादित्यवि
मर्दनं सिंहिकागर्भसंभूतं राहुमावाहयाम्यहं वायव्यकोष्ठमध्ये पत्रे वा दक्षिणामुखान् केतवः धूम्रगंधाक्षतपुष्पैः अंतर्वेदिस
मुद्भवा जैमिनिसगोत्राः केतव इहागच्छत इह तिष्ठत केतुभ्यो नमः पालाशधूम्रसंकाशान्नारकाग्रहमस्तकान् रौद्रात्मकान्महाघोरा
न्केतूनावाहयाम्यहं सूर्यदक्षिणपार्श्वे ईश्वर इहागच्छ इह तिष्ठ ईश्वराय नमः पंचवक्त्रं वृषारूढमुमेशं च त्रिलोचनं आवाहयामी
श्वरं त्वहं गंगावरधारिणं सोमवामपार्श्वे उमां उमे इहागच्छ इह तिष्ठ उमायै नमः हेमाद्रितनयां देवीं वरदां भैरवप्रियां। लंबोदरस्य
जननीमुमामावाहयाम्यहं भौमदक्षिणपार्श्वे स्कंदं स्कंद इहागच्छ इह तिष्ठ स्कंदाय नमः रुद्रतेजःसमुत्पन्नं देवसेनासमन्वितं ष
ण्मुखं कृत्तिकासूनुं स्कंदमावाहयाम्यहं बुधदक्षिणपार्श्वे विष्णुं इहागच्छ इह तिष्ठ विष्णवे नमः देवदेवं जगन्नाथं भक्तानुग्रहकार राम·
कं। चतुर्भुजं रमानाथं विष्णुमावाहयाम्यहं गुरोर्दक्षिणपार्श्वे ब्रह्माणं ब्रह्मन्निहागच्छ इह तिष्ठ ब्रह्मणे नमः कृष्णाजिनांबरधरं पद्म २७

संस्थं चतुर्मुखं वेदाधारं निरालंबं विधिमावाहयाम्यहं शुक्रदक्षिणपार्श्वे इंद्रं इंद्र इहागच्छ इह तिष्ठ इंद्राय नमः देवराजं गजारूढं शु
नासीरं शतक्रतुं वज्रहस्तं महाबाहुमिंद्रमावाहयाम्यहं शनिदक्षिणपार्श्वे यमं यम इहागच्छ इह तिष्ठ यमाय नमः धर्मराजं महाबा
हुं दक्षिणाशापतिं प्रभुं रक्तेक्षणं महाबाहुं यममावाहयाम्यहं राहुदक्षिणपार्श्वे कालं काल इहागच्छ इह तिष्ठ कालाय नमः अनाका
रमनंताख्यं वर्तमानं दिने दिने कलाकाष्ठादिरूपेण कालमावाहयाम्यहं केतुदक्षिणपार्श्वे चित्रगुप्तं चित्रगुप्त इहागच्छ इह ति
ष्ठ चित्रगुप्ताय नमः धर्मराजसभासंस्थं कृताकृतविवेकिनं आवाहये चित्रगुप्तं लेखनीपत्रहस्तकं सूर्यवामपार्श्वे अग्निं
अग्ने इहागच्छ इह तिष्ठ अग्नये नमः रक्तमाल्यांबरधरं रक्तपद्मासनस्थितं वरदं वह्निनामानमग्निमावाहयाम्यहं सोमवामपा
र्श्वे अपः अप इहागच्छत इह तिष्ठत अद्भ्यो नमः चंद्रबिंबसमुद्भूता जगज्जीवनकराः शुभाः औषध्याप्यायनकरा अप आवाह
याम्यहं भौमवामपार्श्वे धरां धरे इहागच्छ इह तिष्ठ धरायै नमः शचीमावाहयाम्यहं शनिवामपार्श्वे प्रजापतिं प्रजा
पत इहागच्छ इह तिष्ठ प्रजापतये नमः आवाहयाम्यहं देवं देवेशं च प्रजापतिं अनेकव्रतकर्तारं सर्वेषां च पितामहं राहु
वामपार्श्वे सर्पान् सर्पा इहागच्छत इह तिष्ठत सर्पेभ्यो नमः अनंताद्यान्महाकायान्नानामणिविराजितान् आवाहयाम्यहं स
र्पान्फणासप्तकमंडितान् केतुवामपार्श्वे ब्रह्माणं ब्रह्मन्निहागच्छ इह तिष्ठ ब्रह्मणे नमः हंसपृष्ठसमारूढं देवतागणपू—
शुक्लवर्णां विशालाक्षीं कूर्मपृष्ठोपरि स्थितां। सर्वशस्यप्रदां देवीं धरामावाहयाम्यहं। बुधवामपार्श्वे विष्णुं· विष्णो इहागच्छ इह तिष्ठ। विष्णवे नमः। शंखचक्रगदापद्महस्तं गरुड
वाहनं। किरीटकुंडलधरं विष्णुमावाहयाम्यहं। गुरुवामपार्श्वे। इन्द्रं। इन्द्र इहागच्छ इह तिष्ठ। इन्द्राय नमः। ऐरावतगजारूढं सहस्राक्षं शचीपतिं। वज्रहस्तं सुराधीशमिन्द्रमावा
हयाम्यहं। शुक्रवामपार्श्वे। इन्द्राणीं। इन्द्राणि इहागच्छ इह तिष्ठ। इन्द्राण्यै नमः। प्रसन्नवदनां देवीं देवराजस्य वल्लभाम्। नानालंकारसंयुक्तां ॥ ५॥

वा·प्र· जितं आवाहयाम्यहं देवं ब्रह्माणं कमलासनं राहोरुत्तरतो गणपतिं गणपत इहागच्छेह तिष्ठ गणपतये नमः लंबोदरमहा
२८ कायं गजवक्त्रं चतुर्भुजं आवाहयाम्यहं देवं गणेशं सिद्धिदायकं ईशानेरुत्तरतो दुर्गां दुर्गे इहागच्छेह तिष्ठ दुर्गायै नमः पत्तने
नगरे ग्रामे विपिने पर्वते गृहे नानाजातिकुलेशानीं दुर्गामावाहयाम्यहं रवेरुत्तरतो वायुं वायो इहागच्छेह तिष्ठ वायवे नमः
आवाहयाम्यहं वायुं भूतानां देहधारिणं। सर्वाधारं महावेगं मृगवाहनमीश्वरं राहोर्दक्षिणे आकाशं आकाश इहागच्छेह
तिष्ठ आकाशाय नमः अनाकारं शब्दगुणं द्यावाभूम्यंतरस्थितं आवाह— याम्यहं देवमाकाशं सर्वगं शुभं। केतोर्दक्षिण
तोऽश्विनौ अश्विनाविहगच्छतमिह तिष्ठतं अश्विभ्यां नमः देवतानां च भैषज्येसु कुमारौ भिषग्वरौ आवाहयाम्यहं देवाव-
श्विनौ पुष्टिवर्द्धनौ इति पंचलोकपालाः एते पंचलोकपालाः सर्वेषामुत्तरतो वास्तोष्पतिः ततः सर्वेषामुत्तरतो वास्तोष्पति
क्षेत्राधिपौ वास्तोष्पत इहागच्छेह तिष्ठ वास्तोष्पतये नमः वास्तोष्पतिं विदिक्कायं भूषणाभिरतं प्रभुं आवाहयाम्यहं देवं सर्वकर्म
फलप्रदं तत्पुरस्तात्क्षेत्रपालं क्षेत्रपाल इहागच्छेह तिष्ठ क्षेत्रपालाय नमः भूतप्रेतपिशाचाद्यैरावृतं शूलपाणिनं आवाहये क्षेत्र
पालं कर्मण्यस्मिन्सुखाय नः ततो मंडलाद्बाह्ये पूर्वादिक्रमेण दिक्पालान् पूर्वे इंद्र इहागच्छेह तिष्ठ इंद्राय नमः इंद्रं सुरपतिश्रेष्ठं वज्र ए·म·
हस्तं महाबलं आवाहये यज्ञसिध्यै शतयज्ञाधिपं प्रभुं आग्नेय्यां अग्ने इहागच्छेह तिष्ठ अग्नये नमः त्रिपादं सप्तहस्तं च द्विमूर्द्धानं द्वि- २८

नामहं। आवाहयामि ब्रह्माणं यज्ञसंसिद्धिहेतवे। इशानन्द्रयो ७॥

नासिकं पक्षमेव च चतुःश्रोत्रमग्निमावाहयाम्यहम् दक्षिणे यम इहागच्छेह तिष्ठ यमाय नमः महामहिषमारूढं दंडहस्तं महाबलं य
ज्ञसंरक्षणार्थाय यममावाहयाम्यहं नैर्ऋत्ये निर्ऋते इहागच्छेह तिष्ठ निर्ऋतये नमः सर्वप्रेताधिपं देवं निर्ऋतिं नीलविग्रहं आवा
हये यज्ञसिध्येनरारूढं वरप्रदं प्रतीच्यां वरुण इहागच्छेह तिष्ठ वरुणाय नमः शुद्धस्फटिकसंकाशं जलेशं यादसांपतिं आवाहये प्र
तीचीशं वरुणं सर्वकामदं वायव्ये वायव इहागच्छेह तिष्ठ वायवे नमः मनोजवं महातेजं सर्वतश्चारिणं शुभं यज्ञसंरक्षणार्थाय वायुमा
वाहयाम्यहं उदीच्यां धनद इहागच्छेह तिष्ठ धनदाय नमः आवाहयामि देवेशं धनदं यस्य पूजितं— महाबलं दिव्यदेहं नरयानगतं
विभुं ऐशान्ये ईशान इहागच्छेह तिष्ठ ईशानाय नमः सर्वाधिपं महादेवं भूतानां पतिमव्ययं आवाहये तमीशानं लोकानामभयप्रदं
निर्ऋति पश्चिमयोर्मध्ये ब्रह्मन् इहागच्छेह तिष्ठ ब्रह्मणे नमः। पद्मयोनिं चतुर्मूर्तिं वेदगर्भं पि— मध्ये अनंत इहागच्छेह तिष्ठ अनं-
ताय नमः अनंतं सर्वनागानामधिपं विश्वरूपिणं जगतां शांतिकर्तारं मंडले स्थापयाम्यहं इत्यहयेनमः ततः आवाहितसू
र्यादिदेवताः सुप्रतिष्ठिता भवत इति प्रतिष्ठाप्य आसनाद्युपचारैर्गंधाद्युपचारैर्वोपदार्थानुसमयेन पूजयेत् आवाहितसूर्याद्यनंता
तेभ्यो नमः इदमासनं इदं पाद्यं एषोऽर्घः इदमाचमनीयं इदं पंचामृतस्नानं इदं शुद्धोदकस्नानं इदमाचमनीयं इदं करो
द्वर्तनं इमानि फलानि इदं तांबूलं इमां दक्षिणां इदं नीराजनं इमां मंत्रपुष्पांजलिं समर्पयामीति सर्वत्र योजयेत् ततः प्रदक्षिणा
इमानि नानावस्त्राणि स· इदं यज्ञोपवीतं स· इदं गंधं स· इमानक्षतान् स· इमानि नानापुष्पाणि स· इदं धूपं स· इदं दीपं स· इमानि भक्ष्यभोज्यानि नैवेद्यानि सं· २

वा·प्र· णानमस्कारं कृत्वा पूजानिवेदनं अनया पूजया आवाहितसूर्योदयः प्रीयतां इति इदं वितानं सूर्यादिभ्योहमुत्सृजामि इतिवि
२९ तानं बध्वा मंडलादीशान्यां भूमौ कलशं स्थापयेत् ॥ नह्यस्या पृथ्वी त्वया धृता लोकादेवि त्वं विष्णुना धृता कलशाधारभूतं हि पवित्रं कु
रु चासनं इति भूमिस्पर्शः यवोसि धान्यराजोयं सर्वौष्यतिकरः शुभः प्राणिनां जीवनोपायः कलशाधः क्षिपाम्यहं इति यवान् कला
कलाहिदेवानां दानवानां कलाकलाः संगृह्य निर्मितो यस्मात्कलशस्तेन उच्यते इति कलशनिधानं गंगे च यमुने चैव गोदावरि सर
स्वति नर्मदे सिंधुकावेरी जलेस्मिन्सन्निधिंकुरु इति कलशपूरणं श्रीखंड चंदनं दिव्यं गंधाढ्यं सुमनोहरं विलेपनं सुगंधाय कल
शे संक्षिपाम्यहं इति गंधं सर्वौषध्यः सुगंधाढ्या दिव्यदृष्टिसमुद्भवाः कलशाप्यायनकरा मंगलाय क्षिपाम्यहं इति सर्वौषध्यः
यज्ञियवृक्षसंभूतान्पल्लवान्सरसान्शुभान् अलंकाराय पंचैतान्कलशे संक्षिपाम्यहं इति पंचपल्लवान् ॥ दूर्वे अमृतसंपन्ने शतमू
लेशतांकुरे शतंमेहरपापानि शतमायुर्विवर्द्धिनी इति दूर्वांकुरान् रत्नगर्भोभव भूमी रत्नगर्भाढ्यभूधराः कलशोरत्नगर्भःस्या
त्तस्माद्रत्नान्यहं क्षिपे इति पंचरत्नानि इदं फलं मया सम्यक् क्षिप्रं कलशेयतः तेनायं कलशः सम्यक्फलवानस्तु सर्वदा इति फ
लं हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः अनंतपुण्यफलदमतः शांतिं प्रयच्छ नः इति हिरण्यं जीवनं सर्वलोकानां लज्जायारक्षणं प राम·
रं सुवेषधारि वस्त्रं हि कलशे वेष्टयाम्यहं इति वस्त्रेण सूत्रेण वा वेष्टनं धान्यपूर्णमिदं पात्रं स्थापितं कलशेयतः तेनायं कलशः पू २९

र्णः पूर्णाः संतु मनोरथाः इति पूर्णपात्रं ततः कलशे वरुणावाहनं वरुणेहागच्छेह तिष्ठ वरुणाय नमः मकरस्थं पाशहस्तं शुभ्र
वर्णं किरीटिनं आवाहये प्रतीचीशं वरुणं यादसांपतिं इत्यावाह्य वरुण सुप्रतिष्ठितो भव इति प्रतिष्ठाप्य सांगाय सपरि
वाराय वरुणाय नमः इति पंचोपचारैः संपूज्य तीर्थान्यावाहयेत् सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः आयांतु मम
शांत्यर्थं दुरितक्षयकारकाः कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः कुक्षौ
तु सागराः सप्त सप्तद्वीपा वसुंधरा ऋग्वेदोथ यजुर्वेदः सामवेदोह्यथर्वणः अंगैश्च सहिताः सर्वे कलशं तु समाहिताः अत्र गायत्री सा
वित्री शांतिः पुष्टिकरी तथा आयांतु मम शांत्यर्थं दुरितक्षयकारकाः इत्यावाह्य प्रार्थयेत् देवदानवसंवादे मथ्यमाने महोदधौ
उत्पन्नोसि तदा कुंभ विधृतो विष्णुना स्वयं त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः त्वयि तिष्ठंति भूतानि त्वयि प्राणाः प्रति
ष्ठिताः शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः त्वयि तिष्ठंति सर्वेपि यतः का
मफलप्रदाः त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ॥ इति प्रार्थना ॥ इति ग्रहपूजनं ॥
ततः पूर्वलिखितैकाशीतिपदे गृहवास्तुमंडले चतुःषष्टिपदे मंडपवास्तुमंडले प्रासादवास्तुमंडले वा मात्स्योक्तलांछितस्थादि
क्रमेणैव स्थापनं तद्यथा ईशानकोणपदे वास्तोः शिरसि वा कोणपदद्दक्षिणांशे शिखिनं रक्तं समावाहयेत् शिखिनं महोज्ज्व

लंमेषाधिरूढं सुरराजवंदितं त्रिशूलहस्तं वरदं महेशं भजा– मिदेवं स्वकुलाभिवृद्ध्यै शिखिन्निहागच्छेह तिष्ठ शिखिने नमः शि
खिनमावाहयामि १ नहृक्षिणैकपदे दक्षिणनेत्रे वा सार्द्धपदे पर्जन्यपीतं एह्येहि जीमूतसुधाप्रवृष्टिचराचरैः सेवितधर्ममूर्ते
पवित्र देवेश गृहाण पूजां ममाध्वरं पाहि भवन्नमस्ते पर्जन्येहागच्छेह तिष्ठ पर्जन्याय नमः पर्जन्यमावाहयामि २ नहृक्षिण
पदद्वये दक्षिणश्रोत्रे पीनवर्णं जयंतं एह्येहि देवेश जयंत राज शचीपते सर्वसुरैकसेव्य पीठेऽत्र यज्ञेश गृहाण पूजां शिवाय नः
पाहि भवन्नमस्ते जयंतेहागच्छेह तिष्ठ जयंताय नमः जयंतमावाहयामि ३ नहृक्षिणपदद्वये – दक्षिणांसे कुलिशायुधं पीतं
एह्येहि देवत्रगराजाधिरूढ सहस्रनेत्र त्रिदशैकराजा शचीपते शक्र सुरेश नित्यं गृहाण पूजां भगवन्नमस्ते कुलिशायुधेहागच्छेह
तिष्ठ कुलिशायुधाय नमः कुलिशायुधमावाहयामि ४ नहृक्षिणपदद्वये दक्षिणबाहौ सूर्यं रक्तं समाह्वयेनेहि भुजं दिनेशं समाभ्य
वाहं द्युमणिं ग्रहेशं सिंदूरवर्णप्रतिभावभासं भजामि सूर्यं स्वकुलाभिवृद्ध्यै सूर्येहागच्छेह तिष्ठ सूर्याय नमः सूर्यमावाहयामि ५।
नहृक्षिणपदद्वये दक्षिबाहावेव सत्यं शुक्लं एह्येहि सत्येश महामहेशा दुष्टांतक स्वच्छ सुधर्ममूर्ते पीठेत्र देवेश गृहाण पूजां म।
माध्वरं पाहि भवन्नमस्ते सत्येहागच्छेह तिष्ठ सत्याय नमः सत्यमावाहयामि ६ नहृक्षिणपदद्वये दक्षिणकूर्परे वा सार्द्धपदे भृशं (
कृष्णं समाह्वयेऽहं द्विभुजं भृशं हि नीलोत्पलाभासविशालनेत्रं नीलाद्रिवर्णप्रतिभावभासं भजामि देवं कुलवृद्धिहेतो भृशेहाग



च्छेह तिष्ठ भृशाय नमः भृशमावाहयामि ७ नहृक्षिणैकपदे दक्षिणप्रवाहौ वा आग्नेय – कोणे नवार्द्धपदे आकाशं कृष्णं समा।
ह्वयेऽहं गगनं दिवौकसां निवासभूतं सुविनिर्मलं च आस्कहीनं रुचिरं पुराणं भजामि नाकं स्वकुलाभिवृद्ध्यै आकाशेहागच्छेह
तिष्ठ आकाशमावाहयामि ८ नहृक्षिणाग्नेयकोणपदे दक्षिणप्रवाहावेव वा आग्नेयकोण दक्षिणार्द्धपदे वायुं। धूम्राह्वयेंग
धवहं सुराध्यं मृगाधिरूढं त्रिदशैकवंद्यं सुपूजकानंदकरं पुराणं भजामि वायुं स्वकुलाभिवृद्ध्यै वायविहागच्छेह तिष्ठ वा
यवे नमः वायुमावाहयामि ९। नत्पश्चिमैकपदे दक्षिणामणिबंधे वा पश्चिमसार्द्धपदे पूषणं एह्येहि पूषन्सुविचारदक्ष हया
धिरूढाविलध पेमूर्त पीठेत्र देवेश गृहाण पूजां शिवाय नः पाहि भवन्नमस्ते पूषन्निहागच्छेह तिष्ठ पूष्णे नमः पूषण
मावाहयामि १० नत्पश्चिमपदद्वये दक्षिणपार्श्वे वितथं शुक्लं समाह्वयंतं वितथं विशालं सुपूजकानंदकरं वरेण्यं ॥
त्रिशूलहस्तं मकराधिरूढं भजामि देवं कमलायताक्षं वितथेहागच्छेह तिष्ठ वितथाय नमः वितथमावाहयामि ११
नत्पश्चिमपदद्वये गृहक्षतं पीतं। एह्येहि लोकेश्वर दिव्यमूर्ते गृहक्षत त्वं कनकाद्रिरूप पीठेत्र देवेश गृहाण पूजां र
क्षाध्वरं नो भगवन्नमस्ते गृहक्षतेहागच्छेह तिष्ठ गृहक्षताय नमः गृहक्षतमावाहयामि १२ नत्पश्चिमपदद्वये दक्षि
णोरौ यमं कृष्णं एह्येहि दंडायुधधर्मराज कालांजनाभास विशालनेत्र विशालवक्षःस्थल रौद्ररूप गृहाण पूजां भगवन्नम

स्ते यमेहागच्छेह तिष्ठ यमायनमः यममावाहयामि १३ तत्पश्चिमपदद्वये दक्षिणजानौ गंधर्वं रक्तं एह्येहि गंधर्वसुरप्रि
येशरत्कोत्पलाभससुधात्ममूर्ते पीठेत्र देवेश गृहाण पूजां मम माध्वरं पाहि भवन्नमस्ते गंधर्वेहागच्छेह तिष्ठ गंधर्वायनमः गं
धर्वमावाहयामि १४ तत्पश्चिमपदद्वये दक्षिणजंघायां वा सार्द्धपदे भृंगराजं कृष्णं समाव्हयेहं शिखिपृष्ठसंस्थं श्रीभृंगरा
जं जगतश्शरण्यं खड्गहस्तं वरदं जनेशं यजामि देवं स्वकुलाभिवृध्यै भृंगराजेहागच्छेह तिष्ठ भृंगराजायनमः भृंगराजमावाहया
मि १५ तत्पश्चिमैकपदे दक्षिणस्फिचि वा नैर्ऋत्यकोणपूर्वार्द्धपदे मृगं पीतं एह्येहि गोरोचनरूपदिव्य मंगप्रकृष्टानि हराणु
रारे· पीठेत्र देवेश गृहाण पूजां मम माध्वरं पाहि भवन्नमस्ते मृगेहागच्छेह तिष्ठ मृगायनमः मृगमावाहयामि १६ तत्पश्चिम
नैर्ऋत्यकोणपदे पादयोः वा नैर्ऋत्यकोणपश्चिमार्द्धपदे पितॄन् रक्तान् समाव्हये दिव्यपितृकुलेशान् रक्तोत्पलाभानिहर
क्तनेत्रान् सुरक्तमाल्यांबरभूषितांश्च नमामि पीठे कुलवृद्धिहेतोः पितरइहागच्छतेह तिष्ठत पितृभ्यो नमः पितॄनावाहयामि १७
तदुत्तरैकपदे वामस्फिचि वा सार्द्धपदे दौवारिकं रक्तं एह्येहि दौवारिक दंडपाणे विशालपंकेरुहलोलनेत्र पीठेत्र देवेश गृहा
ण पूजां शिवाय नः पाहि भवन्नमस्ते दौवारिकेहागच्छेह तिष्ठ दौवारिकायनमः दौवारिकमावाहयामि १८ तदुत्तरपदद्वये वामजं 
घायां सुग्रीवं शुक्लं एह्येहि सुग्रीव सुरेशपूज्य दशाश्ववाह त्रिगुणात्ममूर्ते पीठेत्र देवेश गृहाण पूजां मनोरमां त्वां भगवन्नमस्तो सु 

ग्रीवेहागच्छेह तिष्ठ सुग्रीवायनमः सुग्रीवमावाहयामि १९ तदुत्तरपदद्वये वामजानौ पुष्पदंतं रक्तं आवाहयामि देवेशं पुष्पदंतं म
होज्वलं नानाविभारसंपन्नं महाघंटाविराजितं पुष्पदंतेहागच्छेह तिष्ठ पुष्पदंतायनमः पुष्पदंतमावाहयामि २० तदुत्तरप
दद्वये वामोरौ वरुणं शुक्लं एह्येहि लोकेश्वर पाशपाणे यादोगणैर्वंदितपादपद्म पीठेत्र देवेश गृहाण पूजां पाहि त्वम
स्मान्भगवन्नमस्ते वरुणमावाहयामि २१ तदुत्तरपदद्वये वामपार्श्वे असुरं पीतं रक्तं आवाहयामि दैत्येंद्रमसुरं सुरमर्दनं उग्र
रूपं महावीर्यं खड्गबाणधनुर्द्धरं असुरत्वमिहागच्छ वास्तुपीठमलंकुरु असुरेहागच्छेह तिष्ठ असुरायनमः असुरमावाहयामि २२ त
दुत्तरपदद्वये वामपार्श्वे एव वा सार्द्धपदे शोषं कृष्णं एह्येहि नागेंद्र धराधरेश सर्वामरैर्वंदितपादपद्म नानाफणामंडलराजमा
न गृहाण पूजां भगवन्नमस्ते शोषेहागच्छेह तिष्ठ शोषायनमः शोषमावाहयामि २३ तदुत्तरैकपदे वाममणिबंधे वा वायव्यको
णपदे दक्षिणार्द्धे पापं पीतं। आवाहयाम्यहं भीमं पापमुग्रभयप्रदं अधोमुखं समाहीनं दंडमुद्गरधारिणं पापराजसमागच्छ वास्तु
पीठमलंकुरु पापेहागच्छेह तिष्ठ पापायनमः पापमावाहयामि २४ तदुत्तरवायव्यकोणपदे वामप्रवाहौ वा वायव्यकोणपदोत्त
रार्द्धे रोगं रक्तं आवाहयाम्यहं रोगमनेकविधलक्षणं नानालंकारसंयुक्तं रक्तश्मश्रुविलोचनं आगच्छ भगवन् रोग वास्तुपीठमलं
कुरु रोगेहागच्छेह तिष्ठ रोगायनमः रोगमावाहयामि २५ तत्प्राकदे वामप्रवाहावेव वा सार्द्धपदे अहिं रक्तं। समाहूयेहं फणिराजमग्रे ना

ना फणामंडलराजमानं। भक्तैकगम्यमनुजांशरणंप्रपद्ये जाम्यहिं नः स्वकुलाभिवृध्यै अहिस्त्विहागच्छेहतिष्ठ अहयेनमः अहिमावाहयामि
२६ तन्माकपदद्वये वासुकुपरि मुख्यंरक्तं वामे घवर्णं। आवाहयाम्यहं देवं मुख्यंजीमूतसन्निभं भद्रासनसमारूढं देवगंधर्वसेवितं मुख्य
त्वमिह संतिष्ठ वास्तुपीठमलंकुरुष्व मुख्येहागच्छेहतिष्ठ मुख्यायनमः मुख्यमावाहयामि २७ तन्माकपदद्वये वामबाहौ भल्लाटं कृष्णं आवा
हयाम्यहं देवं भल्लाटमकरध्वजं खड्गहस्तं सुखासीनं नीलोत्पलसमप्रभं भल्लाट त्वमिहागच्छ वास्तुपीठमलंकुरु भल्लाटेहागच्छेहतिष्ठ
भल्लाटायनमः भल्लाटमावाहयामि २८ तन्माकपदद्वये वामबाहावेव सोमं श्वेतं एह्येहि नाराधिपते सुरेश श्वेतोत्पलाभास सुधाकरे
श पीठेत्र देवेश गृहाणपूजां पाहि त्वमस्मान्भगवन्नमस्ते सोमेहागच्छेहतिष्ठ सोमायनमः सोममावाहयामि २९ तन्माक्यदद्वये वामांसे सर्पेह
स्मा आवाहयाम्यहं देवं सुरगं वक्रगामिनं धराधारमहाकायं नानारत्नविभूषितं आगच्छ त्वं महाभाग पीठेस्मिन्संनिधोभव सर्पेहागच्छे
हतिष्ठ सर्पायनमः सर्पमावाहयामि ३० तन्माक्यदद्वये वामश्रोत्रे वा सार्द्धपदे अदितिं पीतां आवाहयाम्यहं देवीमदितिं देवमातरं सर्व
कामप्रदां शुद्धां सर्वविघ्नविनाशिनीं देवमातरिहागच्छ पीठेस्मिन्वास्तुमंडले अदितइहागच्छेहतिष्ठ अदित्यैनमः अदितिमावाहयामि
३१ तन्मागेकपदे वामनेत्रे वा ईशानकोणपदोत्तरार्द्धे दितिं पीतां आवाहयाम्यहं देवीं दितिं देवसमानरं सर्वांगसुंदरीं रम्यां महामोह
करीं शुभां समागच्छात्र पीठेस्मिन्मंडले समलंकुरु दितेइहागच्छेहतिष्ठ दित्यैनमः दितिमावाहयामि ३१ तद्दक्षिणे शिखिपदाधः कोण



पदे मुखे वा तत्पदोत्तरार्द्धे अपः शुक्लवर्णान्समाह्वये श्वेत सुपावनेशानपदस्वरूपान्प्रबलप्रपन्नान् सुपाशहस्तान्वरदानपोत्रपन्नामि
देवान्कुलवृद्धिहेतोः अपइहागच्छतेहतिष्ठत अद्भ्योनमः अपआवाहयामि ३३ तत्र आग्नेयेवायुपदाधः कोणपदे दक्षिणहस्ते वा आग्ने
यकोणपदाधः कोणपदोत्तरार्द्धे सावित्रं शुक्लं समाह्वये दिव्यसुदारकीर्तिं कलाकलाभिस्तु महोग्ररूपं सावित्रमग्र्यं सुविशालमूर्तिं
यजामि देवं स्वकुलाभिवृध्यै सावित्रेहागच्छेहतिष्ठ सावित्रायनमः सावित्रमावाहयामि ३४ नैर्ऋत्ये पितृपदाधः कोणपदे वा
नैर्ऋत्यकोणपदाधः कोणपदोत्तरार्द्धे मेढ्रे जयं श्वेतं आवाहयाम्यहं देवं जयं जयकरं परं।।हयारूढं महाबाहुं नानालंकारशोभितं
आगच्छ जय पीठेत्र मह्यं वास्तुमलंकुरु जयेहागच्छेहतिष्ठ जयायनमः जयमावाहयामि ३५ वायव्ये रोगपदाधः कोणपदे वामह
स्ते वा प— व्यकोणपदाधः कोणपदोत्तरार्द्धे रुद्रं रक्तं एह्येहि सर्व त्र पिनाकपाणे सुरासुरैर्वंदितपादपद्म पीठेत्र देवेश गृहा
णपूजां रक्षां धरन्नो भगवन्नमस्ते रुद्रेहागच्छेहतिष्ठ रुद्रायनमः रुद्रमावाहयामि ३६ ततो मध्य नवपदान्पूर्वपदत्रये दक्षिण
स्तने वा मध्यपद चतुष्टयात्पूर्वे प्राक्पूर्वपदद्वये अर्यमणं कृष्णं आवाहयाम्यहं देवमर्यमाणं सुरेश्वरं नीलांबुजसमाभा
संतं जो राशिं जगत्पतिं समागच्छार्यमन्देव वास्तुपीठमलंकुरु अर्यमन्निहागच्छेहतिष्ठ अर्यम्णोनमः अर्यमणमावाहयामि ३६ त
द्दक्षिणाग्नेयपदे दक्षिणहस्ते वा जयपदे दक्षिणार्द्धे सवितारं रक्तं एह्येहि पीठे सवितर्ग्रहेश सन्मार्गसंयुक्तरथाधिरूढ रक्तोत्पला

भासविशालनेत्र गृहाण पूजां भगवन्नमस्ते सवितरिहागच्छेह तिष्ठ सवित्रे नमः सवितारमावाहयामि ३८ तत्पश्चिमपदत्रये जठरद
क्षिणो वा पदद्वये विवस्वन्तं श्वेतं रक्तांवरं पद्महस्तं विवस्वन्तं प्रभाकरं सर्वपापहरं देवं पीठे त्वावाहयाम्यहं विवस्वन्निहागच्छेह
तिष्ठ विवस्वते नमः विवस्वन्तमावाहयामि ३९ तत्पश्चिमे नैर्ऋत्यकोणपदे इषणयोः वा तत्पदपूर्वार्द्धे विवुधाधिपं रक्तं आवाहया
म्यहं देवं विवुधाधिपतिं प्रभुं चतुर्दन्तगजारूढं हिमाद्रिशिखरोपमं देवराज त्वमागच्छ वास्तुपीठमलंकुरु विवुधाधिपेहागच्छे
ह तिष्ठ विवुधाधिपाय नमः विवुधाधिपमावाहयामि ४० ॥ पूर्वे मध्यतत्पदात्पश्चिमपदत्रये जठरवामभागे वा मध्यपदचतु
ष्टयात्पश्चिमपदद्वये मित्रं श्वेतं एह्येहि रक्तांवरधारिमित्र सप्ताश्ववाह त्रिदशैकनाथ श्वेतोत्पलाभ सविशालनेत्र गृहाण पूजां भ
गवन्नमस्ते मित्रेहागच्छेह तिष्ठ मित्राय नमः मित्रमावाहयामि ४१ तदुत्तरवायव्यकोणपदे वामहस्ते वा एतत्पदपश्चिमा
र्द्धे राजयक्ष्माणं रक्तं आवाहयाम्यहं राजयक्ष्माणं रोगतं दन्तं त्रिशिरस्कं महाघोरं नागयज्ञोपवीतिनं समागच्छ महावाहो
वास्तुपीठमलंकुरु राजयक्ष्मन्निहागच्छेह तिष्ठ राजयक्ष्मणे नमः राजयक्ष्माणमावाहयामि ४२ तत्प्राक्पदत्रये वामस्तने वा
प्राक्पदद्वये पृथ्वीधरं रक्तं आवाहयाम्यहं देवं पृथ्वीधरमतीं द्रियं शंखचक्रगदापद्मैरलंकृतं चतुर्भुजं आगच्छ भगवन्देव वास्तु 
पीठमलंकुरु पृथ्वीधरेहागच्छेह तिष्ठ पृथ्वीधराय नमः पृथ्वीधरमावाहयामि ४३ तत्प्राग्गीशानकोणपदे उरसि वा एतत्पदद 

क्षिणार्द्धे आपवत्सं श्वेतं अवाहयाम्यहं देवमापवत्सं महावलं मयूरवाहनं रौद्रं नानाभूषणभूषितं आपवत्स त्वमागच्छ वास्तु
पीठमलंकुरु आपवत्सेहागच्छेह तिष्ठ आपवत्साय नमः आपवत्समावाहयामि ४४ मध्ये नव पदेषु हृन्नाभ्योः वा मध्यप
द चतुष्टये ब्रह्माणं पीतं श्वेतं च एह्येहि विप्रेन्द्र पितामहेश हंसाधिरूढं त्रिदशैक वंद्य श्वेतोत्पलाभ सकमण्डलहस्त गृहाण पू
जां भगवन्नमस्ते ब्रह्मन्निहागच्छेह तिष्ठ ब्रह्मणे नमः ब्रह्माणमावाहयामि ४५ एवं पंचचत्वारिंशद्देवता आवाह्य उत्तरे दष
वास्तुं स्थापयेत् तत्र दष वास्तु प्रतिमा सर्पाकृतिः द्वितीया द्वारनार्थी मंडलाद्वुत्तरे वेद्यामेव भूमौ कलशं पसे पूर्ववत्कलशं
संस्थाप्य वरुणं संपूज्य तीर्थान्यावाह्य तत्र प्रतिमयोः स्थापनं कुर्यात् तद्यथा प्रतिमे द्वे तेनाभ्य ज्य जलधारां कुर्यात् तत्रमं
त्राः एतद्वै पावनं स्नानं सहस्राक्षमृषिस्मृतं तेन त्वां शतधारेण पावमान्यः पुनंतिमां शक्रादिदशदिक्पाला ब्रह्माणः केशवा
दयः अपस्त्वा घ्नंतु दौर्भाग्यं शांतिं ददतु सर्वदा समुद्रा गिरयो नद्यो मुनयश्च पतिव्रताः दौर्भाग्यं घ्नंतु ते सर्वे शांतिं यच्छंतु सर्व
दा इति जलधारां कृत्वा प्राणप्रतिष्ठां कुर्यात् प्रतिमां हस्तेन संस्पृश्य प्रतिष्ठामंत्रं जपेत् वं ओं ह्रीं क्रौं यं रं लं वं शं षं सं हं लं
क्षं हंसः सोहं मं वास्तुपुरुषस्य इह प्राणा इह प्राणाः पुनः वं ओं ह्रीं क्रौं यं सो वास्तुपुरुषस्य जीव इह स्थितः पुनः वं ओं

वा·म· ह्रीं क्रौं यः सोहं वास्तुपुरुषस्य सर्वेंद्रियाणि पुनः वं आं ह्रीं क्रौं यं सोहं वास्तुपुरुषस्य वाङ्मनश्चक्षुः श्रोत्रजिह्वाप्राणप्राण
३४ इहागत्य सुखं चिरं तिष्ठंतु स्वाहा इति प्रतिष्ठां कृत्वा आवाहनं कुर्यात् वास्तुपुरुषेहागच्छेह तिष्ठ वास्तुपुरुषाय नमः॥
आवाहयामि देवेशं वास्तुदेवं महाबलं देवदेवं गणाध्यक्षं पातालतलवासिनं इत्यावाह्य मंडलाद्बहिः ईशान्यां चरकी
हागच्छेह तिष्ठ चरक्यै नमः चरकीमावाहयामि आग्नेय्यां विदारी हागच्छेह तिष्ठ विदार्यै नमः विदारीमावाहयामि नैर्ऋत्यां पूतने
इहागच्छेह तिष्ठ पूतनायै नमः पूतनामावाहयामि वायव्ये पापराक्षसी हागच्छेह तिष्ठ पापराक्षस्यै नमः पापराक्षसीमावा
हयामि ततः पूर्वे स्कंदेहागच्छेह तिष्ठ स्कंदाय नमः स्कंदमावाहयामि दक्षिणे अर्यमन्निहागच्छेह तिष्ठ अर्यम्णे नमः अर्य
मणमावाहयामि पश्चिमे जृंभकेहागच्छेह तिष्ठ जृंभकाय नमः जृंभकमावा या या मि उत्तरे पिलिपिच्छेहागच्छेह तिष्ठ पि।
लिपिच्छाय नमः पिलिपिच्छमावाहयामि ततः पुनः प्रागादि चतुर्दिक्षु उग्रसेनेहागच्छेह तिष्ठ उग्रसेनाय नमः उग्रसे
नामावाहयामि· डामरेहागच्छेह तिष्ठ डमराय नमः डामरमावाहयामि महाकालेहागच्छेह तिष्ठ महाकालाय नमः महाका। एम·
लमावाहयामि एकपदिहागच्छेह तिष्ठ एकपदे नमः एकपदमावाहयामि पुनः प्रागाद्यष्टदिक्षु इंद्रादीन् इंद्रेहागच्छेह ति ३४

अग्नये नमः। नैर्ऋतेइह। निर्ऋतये नमः। वरुणेह।१॥
ष्ठ इंद्राय नमः इंद्रमा० अग्न इहागच्छेह तिष्ठ वरुणाय नमः वरुणमावाह्य वाय इहागच्छेह तिष्ठ वायवे नमः सोमेहागच्छेह तिष्ठ सो
माय नमः सोममावाहयामि· ईशानेहागच्छेह तिष्ठ भीमरूपेहागच्छेह तिष्ठ भीमरूपाय नमः भीमरूपमा आग्नेय्यां त्रिपुरार इहा
गच्छेह तिष्ठ त्रिपुरारये नमः त्रिपुरारिमा· नैर्ऋत्यां अग्निजिह्वेहागच्छेह तिष्ठ अग्निजिह्वाय नमः अग्निजिह्वमा० ।१ वायव्ये क
रालेहागच्छे तिष्ठ करालाय नमः करालमा· पूर्वे हेतुकेहागच्छेह तिष्ठ हेतुकाय नमः हेतुकमा· दक्षिणे अग्निवेताले हागच्छेह तिष्ठ
अ ग्निवेतालाय नमः अग्निवेतालमा पश्चिमे कालेहागच्छेह तिष्ठ कालाय नमः कालमा· उत्तरे एकपादेह गच्छेह तिष्ठ एकपादा।
य नमः एकपादमा· ईशानपूर्वयोर्मध्ये गंधमाल्येहागच्छेह तिष्ठ गंधमाल्याय नमः गंधमाल्यमा· नैर्ऋत्यपश्चिमयोर्मध्ये ज्वालास्ये
हागच्छेह तिष्ठ ज्वालास्याय नमः ज्वालास्यमा· इत्येवं आवाह्य इंद्रादीनावाहयेत् इति विशेषः आवाहित शिख्यादि देवताः सु
प्रतिष्ठिता भवंतु इति प्रतिष्ठापनं ततः पदार्थानुसमयेन आसनाद्युपचारैः पूजनं तद्यथा नानारत्नसमायुक्तं कार्तस्वरवि
भूषितं आसनं कल्पितं भक्त्या मया यत्तत्प्रगृह्यतां इत्यासनं आवाहितवास्तुपीठदेवताभ्यो नमः इदमासनं नमः। गंगादिस।
लिलाधारं तीर्थमंत्राभिमंत्रितं दूरयात्राश्रमहरं पाद्यं वः प्रतिगृह्यतां आवाहितवास्तु· नमः इदं पाद्यं इति पाद्यं सुगंधपुष्प सि
द्धार्थदूर्वादिभिः सनैर्युतं अर्घं अंजलिना दत्तं भक्त्या तत्प्रतिगृह्यतां आवाहितवास्तु· नमः इदम — र्घं कर्पूरवासितं तोयं मंदा।

वा॰प्र॰ किन्याः समाहृतं आचम्यतां हि भो देवाः सौरभेयं मयार्पितं आवाहितवास्तुपी॰ नमः इदमाचमनीयं इत्याचमनं पंचामृतं मयानीतं प
३५ योदधिघृतंमधु सुशर्करासमायुक्तं स्नानार्थं प्रतिगृह्यतां आवाहितवास्तुपी॰ नमः इदं पंचामृतस्नानं इति पंचामृतं गंगाचय
मुनाचैवगोदावरि सरस्वति तापीपयोष्णीकृष्णा चताभ्यः स्नानार्थमाहृतं तोयमेतत्सुखस्पर्शं स्नानाय प्रतिगृह्यतां आवाहित
वास्तुपी॰ नमः इदं शुद्धोदकस्नानं इति शुद्धोदकं सर्वभूषाधिके शुद्धे लोकलज्जानिवारणे मयोपपादिते तुभ्यं वाससी प्रतिगृह्य
तां अवाहितवास्तुपीनमः इमे वाससी इति वस्त्रं कार्पाससंतुभिर्युक्तं ब्रह्ममंत्राभिमंत्रितं ब्रह्मसूत्रं सोत्तरीयं मद्दत्तं प्रतिगृ
ह्यतां आवाहितवास्तुपीठदेवताभ्यो नमः इमे यज्ञोपवीते इति यज्ञोपवीतं॥ श्रीखंडं चंदनं दिव्यं गंधाढ्यं सुमनोहरं विलेपनं मयाद
त्तं प्रीत्यर्थं प्रतिगृह्यतां आवाहितवास्तुपी॰ नमः इदमनुलेपनं इति चंदनं अक्षताश्च सुरश्रेष्ठाः कुंकुमोक्ताः सुशोभनाः मयानि
वेदिता भक्त्या प्रीत्यर्थं प्रतिगृह्यतां आवास्तुपी॰ मः एतानि सौभाग्यद्रव्याणि इति सौभाग्यद्रव्यं मालादीनि सुगंधीनि नाना
वर्णयुतानि च ऋतूद्भवानि पुष्पाणि पूजार्थं प्रतिगृह्यतां आवाहितवास्तुपी॰ नमः मानिपुष्पाणि इति पुष्पाणि वनस्पति
रसोद्भूतो गंधाढ्यः सुमनोहरः आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां आवाहितवास्तुपी॰ नमः अयं धूपः इति धूपं सा एम॰
ज्यं त्रिवर्तिसंयुक्तं वन्हिना योजितं मया भक्त्या दीपं प्रयच्छामि प्रीत्यर्थं प्रतिगृह्यतां आवाहितवास्तुपी॰ नम॰ अयं दीपः इति ३५

दीपं शर्कराखंडखाद्यानि दधिक्षीरघृतानि च आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यतां आवाहितवास्तुपी॰ नमः इदं नैवेद्यं इति नै
वेद्यं आचमनीयं मध्ये पानीयं उत्तरापोशनं करोद्वर्तनं इदं फलं मया भक्त्या स्थापितं पुरतस्तव तेन मे सफलावाप्तिर्भवेज्ज
न्मनि जन्मनि आवाहितवास्तुपीठाय॰ नमः इदं फलं इति फलं पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतं कर्पूरैलास
मायुक्तं तांबूलं प्रतिगृह्यतां आवाहितवास्तुपी॰ नमः इदं तांबूलं इति तांबूलं हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः
अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे आवाहितवास्तुपीठदेवताभ्यो नमः इमां दक्षिणां इति दक्षिणां चंद्रादित्यौ च ध
रणी विद्युदग्निस्तथैव च त्वमेव सर्वज्योतींषि आर्तिक्यं प्रतिगृह्यतां आवाहितवास्तुपी॰ नमः इदं नीराजनं इति नी
राजनं नमो वो वास्तुपीठस्थदेवताभ्यो नमो नमः पुष्पांजलिं प्रयच्छामि कर्मणः फलसिद्धये आवाहितवास्तुपी॰ नमः
इमां पुष्पांजलिं इति पुष्पांजलिः यानि कानि च पापानि जन्मांतरकृतानि च तानि तानि विनश्यंति प्रदक्षिणपदे पदे इ
ति प्रदक्षिणानमः सर्वहितार्थाय जगदाधारहेतवे साष्टांगोयं प्रणामो हि प्रयत्नेन मया कृतः इति नमस्कारः॥ अ
नया पूजया वास्तुपीठदेवताः प्रीयंतां इति पूजानिवेदनं एवमभ्यर्च्य मंडलादीशान्यामकालमव्रणं कलशं पूर्वव
त्संस्थाप्य तत्र वरुणं संपूज्य तीर्थान्यावाह्य प्रार्थयेत्॥ यथा मेरुगिरेः शृंगं देवानामालयः सदा तथा ब्रह्मादिदे।

वा॰प्र॰ ३६ वानां मम यज्ञे स्थिरो भव इति इत्थं वास्तुपूजां विधाय अथाग्निपश्चिमे उपविश्य अन्वाधानं कुर्यात् समिद्द्वयं गृहीत्वा तत्र
प्रजापतिं इन्द्रं अग्निं सोमं आज्येन आदित्यादिनवग्रहानर्कादिसमिद्भिस्तिलैश्च प्रत्येकं प्रतिद्रव्यं प्रत्येकं चतुश्चतुः सं
ख्याहुतिभिः आज्यचरुभ्यामेकैकया पंचलोकपालवास्तोष्पतिक्षेत्रपालदुर्गादिक्पालान्पलाशसमित्तिलाज्येभ्यः प्रतिद्रव्य प्र
त्येकं चतुश्चतुः संख्याहुतिभिराज्यचरुभ्यामेकैकया शिख्यादिपंचचत्वारिंशद्देवता औदुंबरसमिद्यवमिश्रतिलपायसाज्य
द्रव्यैः प्रतिद्रव्यं प्रत्येकमष्टाष्टसंख्याहुतिभिः वास्तोष्पतिं पंचबिल्वफलैः पंचाहुतिभिः तत्र च आधारादौ उदुंबरसमिदादि
द्रव्यैः प्रतिद्रव्यमष्टोत्तरसहस्रसंख्याहुतिभिः अष्टोत्तरशतसंख्याभिर्वा चरक्यादिबाह्यदेवता एतैरेव द्रव्यैः प्रतिद्रव्यं चतु
श्चतुः संख्याहुतिभिः शेषेणाग्निं स्विष्टकृतमग्निं वायुं सूर्यमग्नीवरुणावग्निंवरुणौ सवितारं विष्णुं विश्वान्देवान्मरुतः स्वर्का
न्वरुणं प्रजापतिं चाज्येनास्मिन्कर्मण्यहं यक्ष्ये इत्युक्त्वाग्नौ समिधावादधाति ततो ब्रह्मोपवेशनाद्यान्यनिर्वापान्तं प्र
णीताप्रणयनकाले सक्षीरं प्रणीताप्रणयनं चरुनिर्वापकाले ग्रहार्थं तंदुलानां चतुः कृत्वः प्रक्षालनेन चरुद्वयं संपाद्याग्नेः
पश्चिमतो निदध्यात् एवं वास्त्वर्थं चतुः कृत्वा तंदुलान्प्रक्षाल्य प्रणीताप आसिच्य चरोरुत्तरतो निदध्यात् ततः आज्या वा॰प्र॰ ३६
धिश्रयणादिपर्युक्षणान्तं इत्याचार्यकर्म ततो यजमानोऽग्नेर्दक्षिणत उदङ्मुख उपविष्टः उपकल्पितहोष्यमाणद्रव्याणि

यक्ष्यमाणदेवताभ्यः शिष्टसमाचरितं त्रेण त्यजेत् तत्र प्रयोगः इमानि उपकल्पितहोष्यमाणद्रव्याणि यक्ष्यमाणदेवताभ्यो
हं त्यजामि यक्ष्यमाणदेवताभ्यो न मम इति वा ततः आचार्य आघारावाज्यभागौ हुत्वा तल्लिंगैः सह ग्रहादिहोमं कुर्यात्
अत्र शूद्रप्रयोगे प्रणवस्वाहाकाररहितेन नमोन्तेन जुहुयादिति कमलाकरभट्टैरुक्तं शूद्रो वर्णश्चतुर्थोपि वर्णत्वाद्धर्ममर्हति वे
दमंत्रस्वधास्वाहावषट्कारादिभिर्विनेति व्यासवचनात् अनंतदेवैस्तु नाममंत्रेणैव स्वाहाकारं तेन आघाराधानाद्याज्यभागान्तं वि
धायेत्युक्तं विष्णुयागप्रयोगेनेन विकल्पः कमलाकरभट्टैरपि नांदीश्राद्धप्रकरणे नित्यश्राद्धप्रयोगे च चतुर्थाधिकारिणं प्रति
एष ते पिंडः स्वाहा नमः इदमन्नं स्वधा नमः इत्युक्तं नाममंत्रलक्षणं गारुडे प्रणवादिनमोन्तं च चतुर्थ्यन्तं च सनमदेवतायाः स्व
कन्नामनाममंत्रः प्रकीर्तितः इति तेन प्रजापतये नमः इति प्रजापतये नमः स्वाहा इति वा एवमाघारावाज्यभागौ त्र
स्तान्वारब्धो हुत्वा अन्वाधानोक्तद्रव्यसंख्याभिर्ग्रहपीठदेवताभ्यः शिख्यादिब्रह्मान्तदेवताभ्यो वास्तुपुरुषाय बिल्वफलैः
पूर्वोक्तद्रव्यैश्च हुत्वा चरक्यादिभ्यश्च हुत्वा स्विष्टकृदादि प्रायश्चित्तहोमान्तं कुर्यात् अथास्य स्पष्टप्रयोगः अत्र आहुतिप्रमाणं
स्रुवेण मात्रावदाज्यं स्रुवेणैव चर्वाहुतिर्माषावरेवहस्तेन चेड्ग्रासमात्रा मृगीमुद्रयाहंस्याच्चातिलाहुतिः सपर्णाय वाहुतिः
प्रादेशमात्रा समिदाहुतिस्त्रिमध्वक्ता सूर्याय० सोमाय० बुधाय० बृहस्पतये० शुक्राय० शनैश्चराय० राहवे० केतुभ्यो० ईश्वर

य उमायै० स्कंदाय० विष्णु० ब्रह्मणे० इंद्राय० यमाय० कालाय० चित्रगुप्ताय० अग्नये० अद्भ्यो० धरायै० विष्णवे० इंद्राय० इंद्राण्यै
० प्रजापतये० सर्पेभ्यो० ब्रह्मणे० गणपतये० दुर्गायै आकाशाय० अश्विभ्यां वास्तोष्पतये० क्षेत्रपालाय० इंद्राय० अग्नये०
यमाय० निर्ऋतये० वरुणाय० वायवे० कुबेराय० ईशानाय० ब्रह्मणे० अनंताय० इति ग्रहहोमः। अथ वास्तुहोमः शिखिने० पर्ज
न्याय० जयंताय० कुलिशायुधाय० सूर्याय० सत्याय० भृशाय० आकाशाय० वायवे० पूष्णे० वितथाय० ग्रहक्षताय० यमाय० गंध
र्वाय० भृंगराजाय० मृगाय० पितृभ्यो० दौवारिकाय० सुग्री वाय० पुष्पदंताय० वरुणाय० असुराय० शोषाय० पापाय० रोगा
य० अहये० मुख्या० भल्लाटाय० सोमाय० सर्पाय० अदित्यै० दित्यै० अद्भ्यो० सावित्राय० जयाय० रुद्राय० अर्यम्णे० सवित्रे०
विवस्वते० विबुधाधिपाय० मित्राय० राजयक्ष्मणे० पृथ्वीधराय० आपवत्साय० ब्रह्मणे० इति पंचचत्वारिंशद्देवताभ्यो हुत्वान्वा
धानोक्तसंख्यया वास्तोष्पतये० पंचसंख्यया पंच बिल्वफलैर्हुत्वा पुनरुक्तद्रव्यैः वास्तोष्पतये० इति अष्टसहस्राद्यन्यतमसं
ख्यया हुत्वा चरकादिभ्यो उक्तसंख्यया हुत्वा ततः स्विष्टकृदादि नवाहुत्यंते अत्र प्रधानस्य वास्तोः पंचभिर्बिल्वफलैरेव होमो
मुख्याः कार्यस्तु पंचभिर्बिल्वैर्बिल्ववीजैरथापि वेसुरुक्तत्वात् बिल्वफलं त्रिधाकृत्वा होमः कर्तव्यः बिल्वफलं त्रिधाकृत्वेति वचनात् राम
द्रव्यपंचकेन सह स्वाद्यन्यतमहोमे त्वा चार एव मूलं ततः शोभनना माप्तये नमः इति पंचोपचारैरग्निं संपूज्य स्विष्टकृद्धोमः ३७

अत्र मूलग्रंथवत् स्विष्टकृदर्थे अर्थान्तरिमाणामिति कात्यायनोक्त्या स्रुवातरस्य कल्पनं आसादनकाले आसादनं प्रोक्षणकाले प्रोक्ष
णं संमार्गकाले संमार्गः तस्मिन्नुपस्तारः समिद्दर्भस्रुवेण हविर्मात्रान्मात्राद्वदानग्रहणं प्रत्युपस्तारः तेन महत्तास्रुचेण ब्रह्मा
न्वारब्धः अग्नये स्विष्टकृते इति जुहुयात् ततो नवाहुतयः अग्नये० वायवे० सूर्याय० अग्नीवरुणाभ्यां० अग्नीवरुणाभ्यां अग्न
ये यसे० अग्नये वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यो० वरुणायादित्याया दितये० प्रजापतये० इति नवाहुतयः
तत इंद्रादिदशदिक्पालेभ्यः सदीपं चतुः प्रक्षालित माषतंडुलबलिं दद्यात् इंद्रायनमः इति संपूज्य इमं माषोदनबलिं सदीपं
सत्कृतं मया शचीपते गृहाणेंद्र प्रसन्नो वरदो भव इंद्राय सांगाय सपरिवाराय सायुधाय सशक्तिकायेतं सदीपं माषोदनबलिं समर्प
यामि भो इंद्र स्वां दिशं रक्ष बलिं भक्ष मम यजमानस्य सकुटुंबस्य सपरिवारस्य आयुः कर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता वरदो भव तनेन
बलिदानेनेंद्रः प्रीयतां अग्नये नमः इमं माषोदनबलिं सदीपं सत्कृतं मया स्वाहापते गृहाण अग्ने प्रसन्नो वरदो भव अग्नये सांगाय०
समर्पयामि भो अग्ने स्वां० भव यमाय नमः इमं माषोदन० मया वैवस्वत गृहाण त्वं प्र० भव यमाय सांगाय० यामि भो यम स्वां० भ
व॥ निर्ऋतये नमः० इमं माषो० मया गृहाण निर्ऋतीश त्वं प्र० भव॥ निर्ऋतये सांगाय० यामि भो निर्ऋते स्वां० भव वरुणाय नमः इमं मा
षोदन० मया मकरस्थ गृहाण त्वं प्र० भव वरुणाय सांगाय० यामि भो वरुण स्वां० भव वायवे नमः इमं माषो मया॥ समीरण गृ

हाणत्वंप्र॰भव॥ वायवेसांगाय॰ यामिभोवायोस्त्वां॰ भवसोमायनमः इमंमाषो॰ मयाउत्तरेशगृहाणत्वंप्र॰भवसांगायसोमाय॰
यामिभोसोमस्त्वां॰ भव ईशानायनमः इमंमाषो॰॰ प्रभो॰शूलपाणेगृहाणत्वंप्र॰भव ईशानायसांगाय॰यामिभोईशानस्त्वां॰ भवब्र
ह्मणेनमः इमांमाषो॰ मयाप्रजापतेगृहाणत्वंप्र॰ भवब्रह्मणेसांगा॰ यामिभोब्रह्मन्त्वां॰ भवअनंताय॥ इमंमाषो॰ मयापन्न
गेशगृहाणत्वंप्र॰ भवअनंतायसांगाय॰ यामिभोअनंतस्त्वां॰ भव इतिदिक्पालबलिः अथग्रहाणां सूर्यायनमः इमंमाषोद॰
मयादिवाकरगृहाणत्वंप्र॰भवसूर्यायसांगायसपरिवारायसायुधायसशक्तिकायईश्वराग्निरूपाधिदेवताप्रत्यधिदेवतासहि
तायएतंसदीपंमाषोदनबलिंसमर्पयामिभोसूर्यअमुंबलिंगृहाणममयजमानस्यसकुटुंबस्यसपरिवारस्यआयुःकर्तासेम
कर्ताशांतिकर्तापुष्टिकर्तावरदोभवअनेनबलिदानेनसूर्यःप्रीयतां सोमायनमः इमंमाषोद॰मयानिशाकरगृहाणत्वंप्र॰ भवसो
मायसांगा॰ सशक्तिकायउमा–बूपाधिदेवताप्र॰ यामिभोसोमअमुं॰ भवअने॰सोमःप्रीयतांभौमायनमः इमंमाषोद॰मया
महीपुत्रगृहाणत्वंप्र॰भवभौमायसां॰ सशक्तिकायस्कंदभूमिरूपाधिदेवताप्रत्यधिदेवतास॰ समर्पयामिभोभौमामुं॰ भवअ
ने॰भौमःप्री॰तां बुधायनमः इमंमाषोद॰ मया इंदुपुत्रगृहाणत्वंप्र॰ भवबुधायसां॰ सशक्तिकायनारायणविष्णुरूपाधि
देवताप्रत्यधिदेवतास॰ यामिभोबुधअमुंभवअनेन॰ बुधःप्रीयतां बृहस्पतयेनमः इमंमाषोद॰ मयाबृहस्पते गृहाणत्वंप्र॰भ



वबृहस्पतयेसां॰ सशक्तिकायब्रह्मेंद्ररूपाधिदेवताप्रत्यधिदेवता॰ यामिभोबृहस्पते अमुं॰ भवअनेन॰ बृहस्पतिःप्रीयतां शुक्रायनमः
इमंमाषोद॰ मयादैत्याचार्यगृहाणत्वंप्र॰ भव शुक्रायसां॰ सशक्तिकायइंद्रेंद्राणीरूपाधिदेवताप्रत्यधिदेवतास॰ यामिभोशु
क्रअमुं॰ भवअनेन॰ शुक्रःप्रीयतां शनैश्चरायनमः इमंमाषोद॰ मयाश नैश्चरअमुं॰ भव॰ अनेन॰ शनैश्चरः प्रीयतां॥
राहवेनमः इमंमाषोद॰ मया॥ अर्द्धकायगृहाणत्वंप्र॰भवराहवेसांन्तशक्तिकायकालसर्परूपाधिदेवताप्रत्यधिदेवता
स॰ यामिभोराहोअमुं॰ भवअनेन॰ राहुःप्रीयतांकेतुभ्योनमः इमंमाषो द॰ मयागृह्ण ध्वंकेतवोयूयंप्रसन्नावरदाः सदा
केतुभ्यःसांगेभ्यःसपरिवारेभ्यःसायुधेभ्यःसशक्तिकेभ्यश्चित्रगुप्तब्रह्मरूपाधिदेवताप्रत्यधिदेवतासहितेभ्यएतंसदीपं
माषोदनबलिंसमर्पयामि भोकेतवअमुंबलिंगृह्णध्वंममयजमानस्यसकुटुंबस्यसपरिवारस्यआयुः कर्तारःक्षेमकर्तारः
शांतिकर्तारः पुष्टिकर्तारस्तुष्टिकर्तारोवरदाभवथ अनेन॰ केतवःप्रीयंतां गणपतयेनमः इमंमाषोद॰ मयागजान
नगृहाणत्वंप्र॰भवगणपतयेसां॰ यामिभोगणपतेअमुं॰भवअनेन॰गणपतिःप्रीयतांदुर्गायैनमः इमंमाषोद॰मया॰गृहा
णदेविदुर्गेत्वं प्रसन्नावरदाभव दुर्गायैसांगायैसपरिवारायैसायुधायैसशक्तिकायैएतंसदीपंमाषोदनबलिंसमर्पयामिभो
दुर्गे अमुंबलिंगृहाणममयजमानस्यसकुटुंबस्यसपरिवारस्यआयुः कर्त्रीक्षेमकर्त्रीशांतिकर्त्रीपुष्टिकर्त्रीतुष्टिकर्त्रीवरदा

वा·प्र· हाण त्वं प्र॰ भव॥ वायवे सांगाय॰ यामिभो वायो स्वा॰ भव सोमाय नमः इमं माषो॰ मया उमेश गृहाण त्वं प्र॰ भव सांगाय सोमाय॰
३८ यामि भो सोम स्वा॰ भव ईशानाय नमः इमं माषो॰ प्रभो॰ शूलपाणे गृहाण त्वं प्र॰ भव ईशानाय सांगाय॰ यामि भो ईशान स्वा॰ भव ब्र
ह्मणे नमः इमं माषो॰ मया प्रजापते गृहाण त्वं प्र॰ भव ब्रह्मणे सांगा॰ यामि भो ब्रह्मन् स्वा॰ भव अनंताय इमं माषा॰ मया पन्न
गेश गृहाण त्वं प्र॰ भव अनंताय सांगाय॰ यामि भो अनंत स्वा॰ भव इति दिक्पालबलिः अथ ग्रह हाणं सूर्याय नमः इमं माषोद॰
मया दिवाकर गृहाण त्वं प्र॰ भव सूर्याय सांगाय सपरिवाराय सायुधाय सशक्तिकाय ईश्वराग्निरूपाधिदेवताप्रत्यधिदेवतासहि
ताय एतं सदीपं माषोदनबलिं समर्पयामि भो सूर्य अमुं बलिं गृहाण मम यजमानस्य सकुटुंबस्य सपरिवारस्य आयुःकर्ता क्षेम
कर्ता शांतिकर्ता पुष्टिकर्ता वरदो भव अनेन बलिदानेन सूर्यः प्रीयतां सोमाय नमः इमं माषोद॰ मया निशाकर गृहाण त्वं प्र॰ भव सो
माय सांगा॰ सशक्तिकाय उमा भूपाधिदेवता प्र॰ यामि भो सोम अमुं॰ भव अने॰ सोमः प्रीयतां भौमाय नमः इमं माषोद॰ मया
महीपुत्र गृहाण त्वं प्र॰ भव भौमाय सां॰ सशक्तिकाय स्कंद भूमिरूपाधिदेवताप्रत्यधिदेवतास॰ समर्पयामि भो भौम अमुं॰ भव अ
ने॰ भौमः प्री॰ तां बुधाय नमः इमं माषोद॰ मया इंदुपुत्र गृहाण त्वं प्र॰ भव बुधाय सां॰ सशक्तिकाय नारायण विष्णुरूपाधि राम·
देवताप्रत्यधिदेवतास॰ यामि भो बुध अमुं भव अनेन॰ बुधः प्रीयतां बृहस्पतये नमः इमं माषोद॰ मया बृहस्पते गृहाण त्वं प्र॰ भ ३८

व बृहस्पतये सां॰ सशक्तिकाय ब्रह्मेंद्ररूपाधिदेवताप्रत्यधिदेवता॰ यामि भो बृहस्पते अमुं॰ भव अनेन॰ बृहस्पतिः प्रीयतां शुक्राय नमः
इमं माषोद॰ मया दैत्याचार्य गृहाण त्वं प्र॰ भव शुक्राय सां॰ सशक्तिकाय इंद्रेंद्राणीरूपाधिदेवताप्रत्यधिदेवतास॰ यामि भो शु
क्र अमुं॰ भव अनेन॰ शुक्रः प्रीयतां शनैश्चराय नमः इमं माषोद॰ मया श नैश्चर अमुं॰ भव॰ अनेन॰ शनैश्चरः प्रीयतां॥
राहवे नमः इमं माषोद॰ मया॥ अर्द्धकाय गृहाण त्वं प्र॰ भव राहवे सांग शक्तिकाय कालसर्परूपाधिदेवताप्रत्यधिदेवता
स॰ यामि भो राहो अमुं॰ भव अनेन॰ राहुः प्रीयतां केतुभ्यो नमः इमं माषोद॰ मया गृह्य ध्वं केतवो यूयं प्रसन्ना वरदाः सदा
केतुभ्यः सांगेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्यः चित्रगुप्त ब्रह्मरूपाधिदेवताप्रत्यधिदेवतासहितेभ्य एतं सदीपं
माषोदनबलिं समर्पयामि भो केतव अमुं बलिं गृह्णध्वं मम यजमानस्य सकुटुंबस्य सपरिवारस्य आयुः कर्तारः क्षेमकर्तारः
शांतिकर्तारः पुष्टिकर्तारः तुष्टिकर्तारो वरदा भवथ अनेन॰ केतवः प्रीयंतां गणपतये नमः इमं माषोद॰ मया गजान
न गृहाण त्वं प्र॰ भव गणपतये सां॰ यामि भो गणपते अमुं॰ भव अनेन॰ गणपतिः प्रीयतां दुर्गायै नमः इमं माषोद॰ मया॰ गृहा
ण देवि दुर्गे त्वं प्रसन्ना वरदा भव दुर्गायै सांगायै सपरिवारायै सायुधायै सशक्तिकायै एतं सदीपं माषोदनबलिं समर्पयामि भो
दुर्गे अमुं बलिं गृहाण मम यजमानस्य सकुटुंबस्य सपरिवारस्य आयुः कर्त्री क्षेमकर्त्री शांतिकर्त्री पुष्टिकर्त्री तुष्टिकर्त्री वरदा

वा·प्र· भवअनेन·दुर्गाप्रीयतांवायवेनमः इमंमाषोद॰मयासमीरणगृहाणत्वंप्र॰भववायवेसो॰यामिभोवायोअमुं·भवअनेन॰
३९ वायुः प्रीयतांआकाशायनमः इमंमाषोदः मया। गृहीनमश्विनौदेवौवरदौभवतंममअश्विभ्यांसांगाभ्यांसपरिवाराभ्यां
सायुधाभ्यांसशक्तिकाभ्यामेतंसदीपंमाषोदनवलिंसमर्पयामिभोअश्विनौअमुंवलिंगृह्णीतंममयजमानस्यसपरिवारस्य।
आयुः कर्तारौक्षेमकर्तारौशांतिकर्तारौपुष्टिकर्तारौतुष्टिकर्तारौवरदौभवतंअनेन॰अश्विनौप्रीयेतां।वास्तोष्पतयेनमः इ
मंमाषोद॰मयावास्तोष्पतेगृहाणत्वंप्र·भववास्तोष्पतयेसां·यामिभोवास्तोष्पतेअमुं·भवअनेन·वास्तोष्पतिः प्रीयतां क्षे
त्रपालायनमः इमंमाषोद·मया·क्षेत्रपालगृहाणत्वंप्र॰भवक्षेत्रपालायसां·यामिभोक्षेत्रपालअमुं·भव इतिग्रहपीठ
स्थदेवेभ्योवलिंदत्वाहस्तौपादौप्रक्षाल्याचम्यपूर्णाहुतिंजुहुयात् अग्नेः पश्चादुपविश्यदेशकालौसंकीर्त्यसग्रहवास्तुशांति।
कर्मणः संपूर्णतायैपूर्णाहुतिंहोष्ये इतिसंकल्प्यपूर्णाहुतिधर्मेणपूर्णाहुतिंजुहुयात् निरूप्याज्यंअग्निधित्या·स्रुचंसंमृज्य
उद्वास्यउत्पूय—वेस्य स्रुचिचतुर्गृहीतंद्वादशगृहीतंवागृहीत्वाचतुर्गृहीतपक्षेकेवलाज्येनोपविष्टस्यैवहोमः द्वादशगृ
हीतपक्षेस्रुचिआज्यंगृहीत्वातत्सारक्तवस्त्रवेष्टितंनारिकेलंनिधायपंचोपचारैः संपूज्यअधोमुखंस्रुवमाच्छाद्यस्रुचं। राम·
मादाय—यजमानान्वारब्धस्तिष्ठंजुहुयात् तत्रमंत्राः चतुः शृंगस्त्रिधावद्धोद्विमूर्द्धानासिकहृयः षण्णेत्रश्चचतुःश्रोत्रस्त्रि ३९

पादःसप्तहस्तकः १ याम्यभागेचतुर्हस्तः सव्यभागेत्रिहस्तकः स्रुवंस्रुचंतथाशक्तिमक्षमालांचदक्षिणेर तोमरंव्यजनंचैव
घृतपात्रंतुवामकेनियुक्तः सप्तभिर्हस्तैर्द्विमुखः सप्तजिव्हकः—दक्षिणेचचतुर्जिव्हस्त्रिजिव्हश्चोत्तरेमुखेद्वादशकोटिमू
र्त्याख्योद्विपंचाशत्कलायुतः४ स्वाहास्वधावषट्कारैरंकितोमेषवाहनः रक्तमाल्यांवरधरोरक्तपद्मासनस्थितः५ पिंगाक्षो
लोहितग्रीवः कृष्णवर्त्मा हुताशनः ज्वालामालावृततनुः सप्तार्चिरमितद्युतिः ६ रुद्रतेजः समुद्भूतोवरदोहव्यवाहनः अग्निर्वै
श्वानरः साक्षात्तस्मैनित्यंनमोनमः अग्नयेवैश्वानरायनमः इतिन्यासोपयजमानस्यशेषेसंपातः संस्रवपात्रेइतिपूर्णाहुतिः ॥
अत्रस्वाहांतहोममंत्रेमूलंमद्वा भारतेशांतिपर्वणिस्वाहाचैवनमस्कारोमंत्रः सूद्रेभिधीयते ताभ्यांशूद्रः पाकयज्ञैर्यजे
तव्रतवान्स्वयं इतिततः फलभूयस्कामोवसोर्धारांजुहुयात् सायथावन्हेरुपरिस्तंभद्वयविधृतामौदुंबरीमृज्वीमको
॥ दशांवाहुप्रमाणामार्द्रीस्रुचं प्रागग्रांनिधायतदुपरिशूलखलाधृतनिर्मलघृतपूरितेनताम्रादिकुंभेनाधोयवमात्रछिद्रे
णाज्यविमुंचताग्नेरुपरिवसोर्धारांपातयेत् तस्यांचघृतधारायांस्रुक्प्रणालिकयासंलग्नस्वर्णजिव्हयाग्नौपतंत्यामाग्नेयादि
सूक्तानिश्रावयेत् तद्यथानमस्तेगार्हपत्यायनमस्तेदक्षिणाग्नयेनमआहवनीयायमहावेदिस्थितायच ब्रह्मणेगार्ह
पत्यायविष्णवेदक्षिणाग्नयेशिवायाहवनीयायशक्तिवेदिस्थितायचनमस्तेसभ्यरूपायनमोगृह्याग्निरूपिणे ८ ॥

 पंचाग्निरूपिणे तुभ्यं नमस्ते परमात्मने महाराजैकराजाय नमस्ते भक्तवत्सल कांडद्वयोपपाद्याय कर्मब्रह्मस्वरूपिणे स्वर्गाप
 वर्गदात्रे च यज्ञेशाय नमो नमः नमोग्निहोत्ररूपाय नमः पर्वेष्टिरूपिणे चातुर्मास्यस्वरूपाय नमः पश्विष्टिरूपिणे सौत्रामणये
नमस्तुभ्यमग्निष्टोमाय ते नमः अत्यग्निष्टोमरूपाय तथा चोक्थ्य स्वरूपिणे नमः षोडशिने तुभ्यं वाजपेयाय वै नमः अतिरात्र न
मस्तुभ्यमाप्तोर्याम नमो नमः नमोस्तु सर्वभूतानामाधाराय महात्मने एकत्रिपंचधिजाय रुज रूपे षडात्मने नमः समस्तदेवा
नां हृत्तिदाय सुवर्चसे शक्ररूपाय जगतामशेषाणां स्थितिप्रद· त्वं मुखं सर्वदेवानां त्वयात्तं भगवन्हविः प्रीणयंत्यखिलान्देवा।
पच्यमानाः सर्वदेवताः हुतं हविस्त्वय्यनलमेघत्वमुपगच्छति ततश्च जलरूपेण परिणाममुपैति तत् तेनाखिलौषधीजन्म
भवत्यनिलसारथे औषधीभिरशेषाभिः सुखं जीवंति जंतवः वितन्वते नरा यज्ञांस्त्वं सृष्टास्त्वोषधीषु च यज्ञै र्देवास्तथा दैत्यान
हृष्टं स्त्रिपावक आप्यायंते च ते परस्त्वदाधाराहुताशनं अतः सर्वस्य योनिस्त्वं वन्हिः सर्वमयस्तथा देवता दानवा यक्षा दैत्या गंध
र्वराक्षसाः मनुष्याः पशवो वृक्षा मृगपक्षिसरीसृपाः आप्यायते त्वया सर्वे संवर्ध्यंते च पावक त्वत्त एवोद्भवं यांति त्वय्यंते च त
थालयं अपः सृजसि देव त्वं त्वमत्सि पुनरेव ताः पच्यमानास्त्वया ताश्च प्राणिनां पुष्टिकारणं देवेषु तेजोरूपेण कांत्या सि 
द्धेष्ववस्थितः विषरूपेण नागेषु वायुरूपेण पक्षिषु मनुजेषु भवान्क्रोधो मोहः पशुमृगादिषु अवष्टंभोसि तरुषु काठिन्यं त्वं म 

हीनुप्रतिजले द्रावत्वेन भवान् जवरूपी तथानिले व्यापित्वेन तथैवाग्ने नभसि त्वं व्यवस्थितः त्वमग्ने सर्वभूतानामंतश्चरसि धा
वक त्वमेकमाहुः कवयस्त्वामाहुस्त्रिविधं पुनः त्वामष्टधा कल्पयित्वा यज्ञवाहमकल्पयन् त्वया सृष्टमिदं विश्वं वदंति प
रमर्षयः त्वामृते हि जगत्सर्वं सद्यो नश्येद्धुताशन॥ तुभ्यं कृत्वा हि द्विजाः पूजां स्वकर्मविहितां गतिं प्रयांति हव्यकव्याद्यैः स्वधा
स्वाहाद्युदीरणात् परिणामात्मवीर्याणि प्राणिनाद्य मरार्चिनेदहंति सर्वभूतानि तत्तो निष्क्रम्य हायनाः जातवेदस्त्वया
सृष्टं विश्वं चेदं महाद्युते तथैव वैदिकं कर्म सर्वभूतात्मकं जगत् नमस्तेनलपिंगाक्ष नमस्तु हुताशन पावकाद्य नमस्ते स्तु न
मस्ते हव्यवाहन त्वमेव भुक्तपीतानां पाचनाद्विश्वपालकः सस्यानां पाककर्तृत्वात्पोष्टा त्वं जगतां तथा त्वमेव मेघस्त्वं वायु
स्त्वं बीजं सस्यहेतुकं पोषाय सर्वभूतानां भूतदत्तस्तथा ह्यसि त्वं ज्योतिः सर्वभूतेषु त्वमादित्यो विभावसुः त्वमहस्त्वं तथा
रात्रिरुभे संध्ये तथा भवान् हिरण्यरेता त्वं वन्हे हिरण्योद्भवकारणं हिरण्यगर्भश्च भवान्हिरण्यसदृशप्रभुः त्वं मुहूर्तः क्षण
स्त्वं च त्वं त्रुटिस्त्वं तथा लवः कलाकाष्ठानिमेषादिरूपेणासि जगत्पते त्वमेतदखिलं कालः परिणामात्मको भवान् श्वेतोग्न
लनिभा जिह्वा प्राणिनां धर्मदायिनी तया नः पाहि पापेभ्य ऐहिकाच्च महाभयात् रक्तवर्णा च या जिह्वा प्राणसंतापकारिणी
तया नः पाहि पापेभ्य ऐहिकाच्च महाभयात् या जिह्वा भवतः काली कालनिष्ठाकरी प्रभो तया नः पाहि पापेभ्य ऐहिकाच्च म ।

वा·प्र· हाभयात् करोतुरगंभूतेभ्यो यातु जिह्वा सुलोचना तया नः पाहि पापेभ्य एहि काव्यमहाभयात् धूम्रवर्णा च या जिह्वा प्राणि
४१ नां गदहारिणी तया नः पाहि पापेभ्य एहि काव्यमहाभयात् मनोभवा च या जिह्वा लघिमागुणलक्षणा तया नः पाहि पापेभ्य एहि
काव्यमहाभयात् स्फुलिंगिनी च या जिह्वा प्राणिनां शर्मदायिनी तया नः पाहि पापेभ्य एहि काव्यमहाभयात् पिंगाक्ष लोहितग्रीव
कृष्णवर्त्मन् हुताशन पाहि मां सर्वदुःखेभ्यः संसारादुद्धरस्व मां। प्रसीद वह्ने सप्तार्चे कृशानो हव्यवाहन अग्ने पावक शुक्रादिनामा
न्मभिस्तुतं मया अग्ने त्वं सर्वभूतानां समुद्भव विभावसो प्रसीद हायघ्यदेव त्वमभिष्टुतं मया। व्याप्त वह्नेः शिवं रूपं यच्च ते सप्त हे
तयः तैः पाहि नः स्तुतो देव पिता पुत्रमिवैतं। एवं स्तुतस्ततस्तेन भगवान्हव्यवाहनः ज्वालामालाहृततनुस्तस्यासीद्यतो मु
नेः देवो विभावसुः प्रीतः स्तोत्रेणानेन वै द्विज तं शान्तिमाह प्रणतं मेघगंभीरवागयं परितुष्टोऽस्मि ते विप्र भक्त्या यन्मे स्तुतिः
कृता वरं ददामि भवते प्रार्थ्यतां प्रसीदेप्सितं भगवन्कृतकृत्योऽस्मि यत्त्वां पश्यामि रूपिणं तथापि भक्तिनम्रस्य शृणु यत्तां भव
ताम मभ्रात् यद्गतो देव मया चार्यजितात्रमात् आगतः स्वाश्रमे धिष्ण्यान्तस्तानायं स पश्यतु ममापराधात्संत्यक्तपत्ने धि
ष्ण्य विभावसो तत्त्वयाधिष्ठितं सोद्य पूर्ववत्पश्यतां द्विजः तथान्यमपि मे देवप्रसादं कुरुष्वेष यद्विपुत्रो विशिष्टो भवतु निर राम·
पत्यस्य मे गुरोः यथा मैत्री स्वतनये संकरिष्यति मे गुरुः तथा समस्तसत्वेषु भवत्वस्य मनो मृदुः यस्तु त्वां स्तोष्यतेनेन प्री ४१

निपातोऽसि येन मे स्तोत्रेण तस्य वरदो भवेयामत्प्रसादतः गुरोरर्थे यतो ब्रह्मन्याचितं ते वरद्वयं भविष्यत्येतदखिलं गुरोर्यन्मा
र्थितं त्वया अनेन यश्च स्तोत्रेण स्तोष्यते मां समाहितः तस्याभिलषितं सर्वं पुण्यभाग्यं भविष्यति यज्ञेषु सर्वकालेषु तीर्थेज्या
होमकर्मसु धर्माय पठतामेन त्वमनुष्ठिकरं परं नाशयिष्यत्यदघं यच्च वित्तं पुण्यवर्द्धनं अहोमकाले देशे वा अयोग्यैरपि वा
हुते ये दोषास्तेपि वै सद्यः शमयिष्यति साम्प्रतं वसोर्धाराहुतौ सम्यक्काष्ठिते धिष्ण्यसंनिधौ धारावसुगुणोपेता घृतार्चिषि वसुप्र
दा पौर्णमास्याममावास्यां पर्वस्वन्येषु यस्तवः ममैष संस्तुतो मर्त्यैर्भविता पापनाशनः इत्याग्नेयं देवदेव जगन्नाथ विस्तो
यज्ञपते विभो पद्मनाभ हृषीकेश कंसचाणूरमर्दन नमस्ते पुंडरीकाक्ष नमस्ते पुरुषोत्तम नमस्ते सर्वलोकात्मन्भक्तानुग्रह
कारक नमस्ते व्यक्तसंगाय संतोषपरमात्मने ज्ञानविज्ञानरूपाय ब्रह्मणे ज्योतिःशालिने गुणातिक्रान्तवेगाय पुरुषाय महा
त्मने अव्यक्ताय पुराणाय विष्णवे ते नमो नमः इति वैष्णवं नमः सोमाय शान्ताय सगुणायादिहेतवे वृषारूढाय देवाय पार्व
तीपतये नमः पिनाकिने नमस्तुभ्यं नमो मीढुष्टमाय च वरदायाहूकायायपन मञ्चहृद्धमौलिने त्रिलोचनाय रुद्राय पं
चवक्त्राय ते नमः नमामि त्वां विरूपाक्ष नीलग्रीव नमोऽस्तु ते त्रिनेत्राय नमस्तुभ्यमुमादेहार्द्धधारिणे त्रिशूलधारिणे तुभ्यं
भूतानां पतये नमः पिनाकिने नमस्तुभ्यं नमो मीढुष्टमाय च नमामि त्वां महाभूतपतये त्वां नमाम्यहं स्वयंभिस्तां नमो ९।

वा·प्र क्ता चभक्तानां राज्यदायक सूर्यरूपं समास्थाय देहीनां देहदायक यतीनां मुक्तिदस्त्वं चभूतानां चापिमुक्तिदः राजसेन स्वयंब्रह्मा
४२ सात्विकेन स्वयं हरिः तामसेन स्वयं रुद्रस्त्रितयं त्वयि संस्थितं नमो विरंचि दिघावी शभेदेन परमात्मने निसर्गस्थितिसंहा
रव्यापिने परमात्मने विश्वेश्वरं विरूपाक्ष विश्वरूप सदाशिव शरणं भव भूतेश करुणाकर शंकर हर शंभो महादेव विश्वेश्वराम
रवल्लभ शिव शंकर सर्वात्मन् नीलकंठ नमोस्तुते मृत्युंजय महारुद्र सर्वेश शशिशेखर चंद्रचूड महादेव पार्वतीश नमोस्तुते मृ
त्युंजयाय रुद्राय नीलकंठाय शंभवे अमृतेशाय शर्वाय महादेवाय ते नमः इति रौद्रं ज्योत्स्नापते नमस्तेस्तु शशांक रजनी
पते क्षीरोदधि समुद्भूत हरमौलि विभूषण सुधाकर द्विजाधीश त्रैलोक्यप्रीतिकारक ओषध्याप्यायनकर सोम कंदर्पवर्द्धन
शीतरश्मे निशानाथ विधो कुमुदिनीपते सुधाकर तुषाराभ लक्ष्मीभ्रातर्नमोस्तुते अत्रिपुत्र नमस्तेस्तु नमस्ते शशलांछन श्वे
तांबर नमस्तेस्तु ताराधिप नमोस्तुते इमैर्दशं चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः स्वा
हा इदमग्नये विश्वेदेवे रुद्राय सोमाय वैश्वानराय च न मम इति त्यागः इति वसोर्द्धारां विधाय तत्सन्ने वाग्रेस्तु क्यासनं इति वसो
र्द्धाराः ततः संस्रवप्राशनं आचमनं पवित्राभ्यां मार्जनं अग्नौ पवित्रप्रतिपत्तिः ब्रह्मणे पूर्णपात्रदानं कृतैतत्ग्रहवास्तुशां राम·
तिकर्मणो गतया विहितमिदं पूर्णपात्रं ब्राह्मणतुभ्यमहं संप्रददे इति ब्रह्मणो हस्ते प्रतिगृह्यतामिति दद्यात् ब्रह्मा प्रतिगृह्णामीति गृह्णीया ४२

ततो वास्तुपीठस्य पश्चादुपविश्य तत्तत्स्थाने पलाशपर्णे वा शिख्यादिभ्यः सदीपं बिडालकर्णपरिमितं प्रतिदैवतं पायसबलिं दद्या
त् अथवा पायसं दद्यात् सर्वेभ्यश्चस— दीपकमित्युक्तत्वात् तत्र प्रयोगः शिखिन एष सदीपपायसबलिर्नमः पर्जन्यायैषस· दी
पपा० जयंतायैषस· कुलिशायुधायैषस० सूर्यायैषस· सत्यायैषस० भृशायैषस० आकाशायैषस० वायव एषस· पूष्ण ए
षस० वितथायैषस० गृहक्षतायैषस० यमायैषस० गंधर्वायैषस० भृंगराजायैषस० मृगायैषस० पितृभ्य एषस० दौवा
रिकायैस० सुग्रीवायैषस० पुष्पदंताये· वरुणाये· असुराये· शोषाये· पापाये· रोगायैषस० अहय एषस० मुख्यायैषस० भल्ला
टायैषस० सोमायैषस· सर्पायैस० अदित्या एषस· दित्या एषस० अप एषस· सवित्रायैषस० जयायैषस० रुद्रायैषस० अर्य
म्ण एषस० सवित्र एषस० विवस्वन एषस० विबुधाधिपायैषस० मित्रायैषस· राजयक्ष्मण एषस· पृथ्वीधरायैषस० आपव
त्सायैषस· ब्रह्मण एषस० इति पंचचत्वारिंशद्देवताभ्यो बलिं दत्वा हिरण्यं दशायुधाय दद्यात् सर्वेभ्यो हिरण्यं च ब्रह्मणे गां पयस्विनी
मित्युक्तत्वात् इदं हिरण्यं शिखिने नमः इदं० पर्जन्याय० इदं· जयंताय इदं· कुलिशायुधाय· इदं· सूर्याय· इदं· सत्याय· इदं भृश
य० इदं· आकाशाय· इदं· वायवे० इदं० पूष्णे· इदं० वितथाय० इदं० गृहक्षताय० इदं यमाय इदं· गंधर्वाय· इदं भृंगराजाय· इदं· मृगा
य· ————· इदं यमाय पितृभ्य इदं· दौवारिकाय इदं· सुग्रीवायेदं· पुष्पदंतायेदं· वरुणायेदं· असुराय० इदं· शोषाय· इदं पापाय· इदं· रोगाय·
०इदं

इदं॰ सावित्राय॰ इदं॰
वा॰प्र॰ इदं॰ अहये॰ इदं॰ मुख्याय॰ इदं॰ भल्लाटाय॰ इदं॰ सोमाय॰ इदं॰ सर्पाय॰ इदं॰ अदित्यै॰ इदं॰ दित्यै॰ इदं॰ अद्भ्यो॰ इदं॰ सावित्राय॰ इदं॰ राजयक्ष्मणे॰ इदं॰
४३ जयाय॰ इदं॰ रुद्राय॰ इदं॰ अर्यम्णे॰ इदं॰ सवित्रे॰ इदं॰ विवस्वते॰ इदं॰ विबुधाधिपाय॰ इदं॰ मित्राय॰ इदं॰ राजयक्ष्मणे॰ इदं॰
॰ पृथ्वीधराय॰ इदं॰ आपवत्साय॰ ततः इदं पयस्विनीगोनिष्क्रयभूतं द्रव्यं ब्राह्मणेनमः इतिहिरण्यं पयस्विनीं चदत्वा च
रक्षादिभ्यो माषोदनबलिं दद्यात् चरक्यै एषमाषोदनबलिर्नमः विदार्यै एषमा॰ पूतनायै एषमा॰ पापराक्षस्यै एषमा॰ स्कं
दायै एषमा॰ अर्यम्णे एषमा॰ जृंभकायै एषमा॰ पिलिपिच्छायै एषमा॰ उग्रसेनायै एषमा॰ डामरायै एषमा॰ महाकालायै॰ एकपदे एषमा॰
इंद्राये ष॰ अग्नय एष॰ यमाये॰ निर्ऋतय एष॰ वरुणाये॰ वायव एष॰ सोमाये ष॰ ईशानाये ष॰ प्रासादवास्तुश्चेदिंद्रादिबलिं
दानात्पूर्वं वस्यमाणदेवताभ्यो बलिदानं तद्यथा भीमरूपाये ष॰ त्रिपुरान्तकाय ष॰ अग्निजिह्वाये ष करालाये ष॰ हेतुकाये ष॰
अग्निवेतालाये ष॰ कालाये ष॰ एकपादाये ष॰ गंधमाल्याये ष॰ ज्वालास्याये॰ तत इंद्रादिभ्यः दिक्पालानां बलिं दत्वा से
त्रपालबलिं ततः आगमोक्तेन मंत्रेण वेदमंत्रेण वेनयेत्युक्त्वा दद्यात् क्षेत्रपालबलिर्देयः महति पात्रे॰ सदीपमाषोदनं निधाय राम॰
संपूज्य नमो भगवते क्षेत्रपालाय त्रयस्त्रिंशत्कोटिदेवाधिदेवाय निर्जिताय भारभासुरलेत्रय खांगार्कं किणि ज्वालमुखभैरवरू ४३
पिणे तुरु तुरु मुरु मुरु ललललल षषषषषकेकार दूरितं दिक्षु रवकरव महावाहो अद्य कर्तव्ये वास्तुकर्मणि अमुकं यजमानं

हस्तौपादौ प्रक्षा
पाहि पाहि आयुः कर्त्तासि कर्त्ता भव दीपसहितं माषोदनबलिं गृह्ण स्वाहा इति बलिं दत्वा ईशान्यामुत्सृजेत् ॥ हस्तौपादौ प्रक्षा
ल्याचम्य यजमानमभिषिंचेत् उक्तं च आचार्यस्तु ततो नत्वा कलशं मंत्रमंत्रितं ॥ स्वयं प्रत्यङ्मुखो भूत्वा प्राङ्मुखं यजमानकं
स्वशाखोक्तेन मंत्रेण ह्यागमोक्तेन वा तथा ॥ स्नापयेत्कुंभतोयेन मंत्रैः पौराणिकैस्तथा दारपुत्रसमेतं च यजमानं सकत्विजं वा
स्तुपीठादुत्तरतो यजमानं सपत्नीकं अहतवाससं सपरिवारं प्राङ्मुखपीठे उपवेश्य ऋत्विक् हितः स्वयं प्रत्यङ्मुखं निष्ठत्वभि
षिंचेत् तत्र मंत्राः सुरास्त्वामभिषिंचंतु ये च सिद्धाः पुरातनाः ॥ ब्रह्मा विष्णुश्च शंभुश्च साध्याश्च समरुद्गणाः । आदित्या वसवो
रुद्रा अश्विनौ च भिषग्वरौ । अदितिर्देवमाता च स्वाहा सिद्धिः सरस्वती कीर्तिर्लक्ष्मीर्धृतिः श्रीश्च सिनीवाली कुहूस्तथा ॥ दितिश्च
सुरसा चैव विनता कद्रुरेव च ॥ देवपत्न्यश्च याः प्रोक्ता देवमातर एव च सर्वास्त्वामभिषिंचंतु शुभाश्चाप्सरसां गणाः ॥ नक्षत्राणि
मुहूर्ताश्च पक्षाहोरात्रसंधयः संवत्सरा दिनेशाश्च कलाः काष्ठाः क्षणा लवाः ॥ सर्वे त्वामभिषिंचंतु कालस्यावयवाः शुभाः
॥ एते चान्ये च मुनयो वेदव्रतपरायणाः सशिष्यास्ते भिषिंचंतु सदा नाश्च तपोधनाः ॥ वैमानिकाः सुरगणाः सरितः सागरैः
सह ॥ मुनयश्च महाभागा नागाः किंपुरुषाः खगाः वैखानसमहाभागा द्विजा वैहायनाश्च ये ॥ सप्तर्षयः सदाराश्च
ध्रुवस्थानानि यानि च ॥ ॥ मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुरंगिराः ॥ भृगुः सनत्कुमारश्च सनकोथ सनं॰

दनः॥सनातनश्च दक्षश्च जैगीषव्यो भगंदनः।एकतश्च द्वितश्चैव त्रितो जाबालिकश्यपौ॥दुर्वासा दुर्विनीतश्च कण्वः कात्याय
नस्तथा॥मार्कंडेयो दीर्घतपाः शुनःशेपो विदूरथः॥और्वः संवर्तकश्चैव च्यवनश्च पराशरः॥द्वैपायनो यवक्रीतो देवराजः स
हानुजः।पर्वतास्तरवो वल्यः पुण्यान्यायतनानि च।प्रजापतिर्दितिश्चैव गावो विश्वस्य मातरः।वाहनानि च दिव्यानि सर्वे लोका
श्चराचराः।अग्नयः पितरस्तारा जीमूताः खं दिशो जलं॥एते चान्ये च बहवो वेदव्रतपरायणाः।सेंद्रा देवगणाः सर्वे पुण्यश्रवण
कीर्तनाः।तोयैस्त्वामभि[..]चंतु सर्वानर्थनिवर्हणे।यथाभिषिक्तो मघवा द्यैर्मुदितमानसैः॥इति शांतिकलशेनाभिषिच्य स
र्वौषधीभिरनुलिप्य सपत्नीकं यजमानं शुद्धोदकेन स्नापयेत्॥ततः आचार्यो वास्तुमंडलमध्ये ब्रह्मस्थाने सुरूपां भूषितां
स्त्रीरूपां पृथिवीं ध्यात्वा॥धरायै नमः इति पंचोपचारैः संपूज्य प्रार्थयेत्।सर्वदेवमयं वास्तु वास्तुदेवमयं परं इति॥ततो गृहं
मंडपं प्रा[..]सादं वा त्रिसूत्र्या वक्ष्यमाणैर्मंत्रैरीशानमारभ्येशानपर्यंतं प्रादक्षिण्येन वेष्टयेत्॥तत्र मंत्रः॥प्राचीमैरावतो रक्षेद्धे
षश्चापि तथावतु॥अग्नेय्यां पुंडरीकाख्यो रक्षेन्नागश्च वासुकीः॥दक्षिणां वामनः पातु तथा नागश्च तक्षकः॥कुमुदो नैर्ऋ
तो रक्षेत्तथा कर्कोटको बली॥प्रतीचीमंजनाख्यश्च शंखपालस्तथावतु॥पुष्पदंतो ध्रुवा वायव्यां दिग्गजः कुलिशः फणिः॥उ
दीचीं सार्वभौमाख्यस्तथा नागश्च कंबलः।ऐशान्यां सुप्रतीकाख्यो रक्षेद्दश्च नरस्तथा इन्द्रादि दशदिक्पालाः सायुधाश्च स



वाहनाः ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वंतु सर्वतः॥इति मंत्रैर्यथासूत्रच्छेदो न भवति तथा वेष्टनीयं॥छिन्ने सूत्रे त्वशुभं त्वद्
र्शनात्।अत्र सूत्रवंधनात्माकाननाको च्छ्रुयमथ्याचारा दृश्यादि शास्तु कर्तव्यं॥ततो दुग्धपूर्णया सस्तनकुंभ्या जलपूर्णया च स्तनकुं
भ्या वक्ष्यमाणमंत्रैस्तथैव प्रादक्षिण्येन धाराद्वयमविच्छिन्नं कुर्यात्।तत्र मंत्राः।लवणः क्षीरतोयश्च घृतमंडोदकस्तथा।दधिमं
डः सुरोदश्च इक्षुस्वादूदकस्तथा॥पुष्करश्च प्रयागश्च प्रभासं नैमिषं तथा॥गयाशिरो ब्रह्मशिरस्तथैवोत्तरमानसं।गंगाद्वारं
कुशावर्ते बिल्वकं नीलपर्वतं।वाराहं भृगुतुंगं च शालग्राम सरस्तथा।शूर्पारकं पौंडरीकं गंगासागरसंगमः।धर्मारण्यं फल्गुतीर्थं
मविमुक्तं तु मोक्षदं।गंगा सरस्वती पुण्या शरयूर्गंडकी तथा।कौशिकी यमुना क्षिप्रा चंद्रभागा च गोमती।मंदाकिनी दृषाणी चत्ता
— मसी च कुमुद्वती वैणावेत्ररणी भीमा कृष्णावेण्या च वंजुरा॥गोदावरी भीमरथी गोनमी चाम्बनद्यपि॥तुंगभद्रा ताम्रप
र्णी कावेरी वेत्रवत्यपि॥नेत्रा चालकनंदा च करतोया च पिप्पला।सर्वपापशमन्यश्च सर्वलोकस्य मातरः॥स्वतोयधारया[..]
वास्तुभूमिं सिंचंतु सर्वतः॥इति धाराद्वयं कृत्वा गृहस्य प्रासादस्य वा आग्नेये आकाशपदे जानुदघ्नमवटं खात्वा गोमयेनोप
लिप्य शुक्लचन्दनपुष्पाक्षतादिभिरलंकृत्य यवादि सप्तबीजानि दध्योदनं च निक्षिप्य॥सप्तबीजानि यथा।यवगोधूम
धान्यानि तिलाः कंगुस्तथैव च॥श्यामाकाश्चणकाश्चैव सप्तबीजमुदाहृतम्।ततो नवकुंभमत्र जलपूर्णं शुक्लैकपुष्पयुते

वा॰प्र॰ ४५ गंधादिभिरर्चितं हस्तद्वयेनादाय जानुभ्यां धरिणीं गत्वा ॥ वरुणाय नमः इति जलेन गर्तं पूरयेत् तत्र प्रदक्षिणावर्तिते ऊर्ध्व
मुखपुष्पे शुभं ॥ ततो मृन्निर्मितां पंचसूत्रपेटिकां सप्तवीजरत्नशैवालफलपुष्पाणि प्रक्षिप्य पूर्वस्थापितं वृषवासं तूर्य
मंगलघोषेणानीय तत्स्थां संस्थाप्य गंधादिभिः संपूज्य प्रार्थयेत् ॥ पूजितोसि मया वास्तो होमाद्यैरर्चनैः शुभैः ॥ प्रसीद पाहि विश्वे
श देहि मे गृहजं सुखं ॥ वास्तुपुरुष नमस्तेस्तु भूशय्याभिरत प्रभो ॥ मद्गृहं धनधान्यादिसमृद्धं कुरु मे सदा ॥ प्रार्थयाम्यहं देव
शालाया अधिपस्तु यः ॥ प्रायश्चित्तप्रसंगेन गृहार्थं यन्मया कृतं ॥ मूलच्छेदं तृणच्छेदं कृमिकीटनिपातनं । हननं जलजीवानां
भूमौ शस्त्रेण घातनं ॥ अनृतं भाषितं यच्च किंचिद्दुःखप्रपातनं ॥ एतत्सर्वं क्षमस्वेतो यन्मया दुष्कृतं कृतं गृहार्थं यत्कृतं पापमज्ञा
नेनापि चेतसा ॥ तत्सर्वं क्षम्यतां देव गृहशालां शुभां कुरु । इति संप्रार्थ्य पेटिका — माच्छाद्य तस्मिन्गर्ते शनैर्निक्षिपेत्तेन मंत्रेण स
शैलसागरां पृथ्वीं यथा वहसि मूर्द्धनि ॥ तथा मां वह कल्याणं संपत्संततिभिः सह ॥ इति ॥ ततस्तद्गर्तं धृतमृदा गर्तं पूरयेत् ॥
पूरिते मृदाधिक्ये उत्तमं । साम्ये मध्यमं ॥ न्यूनेत्वधमं फलं विद्यात् ॥ गर्तसमतां विधाय तद्भूमिं गोमयेनोपलिप्य शुक्लगंधपु
ष्पाक्षतैर्भूषयेत् ॥ तत्र दीपस्थापनमित्याचारः । ततो यजमानः अग्नेः पश्चात्प्राङ्मुख उपविश्य उदङ्मुखमाचार्यमुपवेश्य राम॰
संपूज्य ॥ अलंकृतां सवत्सां गां वासोयुगं च दक्षिणां दद्यात् । गां संपूज्य ॥ कुशजलान्यादाय अमुकगोत्रामुकशर्मणे आचार्याय कृ ४५

तैतत्सनवग्रहगृहवास्तुशांतिकर्मणः सांगतासिध्यर्थं सालंकृतां सवत्सां इमां गां रुद्रदैवत्यां बृहस्पतिदैवतं वासोयुगं च
दक्षिणात्वेन तुभ्यमहं संप्रददे न मम इति आचार्यहस्ते कुशजलयुतं गोपुच्छं वासोयुगं च दद्यात् । आचार्यः स्वस्ति इति वदे
त् ॥ ब्रह्मणेऽनड्वाहं ॥ ब्रह्मन्कृतैतत्॰ध्यर्थमिममनड्वाहं रुद्रदैवत्यं दक्षि॰ ददे । सदस्याय अश्वं । सदस्यकृतै॰र्थमिममश्वं यमदैवत्यं द
क्षि॰ ददे ॥ गाणपत्याय सुवर्णं उपद्रष्टृभ्यश्च ॥ गाणपत्यकृतै॰र्थमिदं सुवर्णं अग्निदैवतं दक्षि॰ ददे ॥ उपद्रष्टृकृतै॰र्थमिदं सुवर्णं
दक्षिणी॰ ददे । ऋत्विग्भ्यश्च ॥ ऋत्विक्कृतैतत्॰ दक्षिणा॰ ददे इति दक्षिणादानं । प्रत्यक्षदक्षिणादानासंभवे निष्क्रयो देयः । त
त्प्रत्यर्पमूहः कल्पनीयः । ततो गृहपीठदेवतानां वास्तुपीठदेवतानां पंचोपचारैरुत्तरपूजां कृत्वा क्षमध्वं इति क्षमाप्य
यांतु गृहगणाः सर्वे पूजामादाय पार्थिवात् ॥ इष्टकामप्रसिध्यर्थं पुनरागमनाय च ॥ यांतु देवगणाः सर्वे पू॰ य च । इति विसृज्य
ऽचार्याय दद्यात् ॥ आचार्य इमे पीठे सकलशे तुभ्यमहं संप्रददे इति प्रतिपत्तिरूपत्वात्तत्र दक्षिणा । ततो विभूतिं वंदनं कृत्वाऽ
ग्निं विसर्जयेत् ॥ गच्छ त्वं भगवन्नग्ने स्वस्थानं कुंडमध्यतः । हव्यमादाय देवेभ्यः शीघ्रं देहि प्रसीद मे । इति ॥ ततो ब्राह्मणभोजनं
कृतैतत्सनवग्रहमखगृहवास्तुशांतिकर्मणः सांगतासिद्ध्यर्थं सूर्यादीनां शिख्यादीनां च प्रीत्यर्थं प्रतिदैवतं त्रीन्स्त्रीन् एकैकं वा
शक्त्यनुसारेण एतावत्संख्याकान्ब्राह्मणान्यथोत्पन्नेनान्नेन यथाकालमहं भोजयिष्ये दक्षिणां च दास्ये इति । कृतैतत्सग्रहमख

गृहवास्तुशांतिकर्मणि न्यूनातिरिक्तदोषपरिहारार्थं नानागोत्रेभ्यो नानाशर्मभ्यो ब्राह्मणेभ्यः समाश्रितबंधुवर्गेभ्यो दीनानाथेभ्य
श्च यथोत्साहं भूयसीं दक्षिणां दातुमहमुत्सृज्ये॥ इति भूयसीं दत्वा कर्मेश्वरार्पणं कुर्यात् चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च॥
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु॥ मया यत्कृतं यथाकालं यथादेशं यथाज्ञानं यथाशक्ति वास्तुशान्त्याख्यं कर्म तेन श्री
परमेश्वरः प्रीयतां तत्सद्ब्रह्मार्पणमस्तु। इति सकुशजलं क्षिपेत्। ततः सदस्यादीन्वस्त्रकुंचंदनादिभिः पूजयित्वा करौ संपुटी
कृत्य मया यत्कृतं वास्तुपूजनाख्यं कर्म तत्कालहीनं शक्तिहीनं श्रद्धाहीनं भक्तिहीनं च भवतां ब्राह्मणानां वचनात्सर्वं संपूर्णमच्छि
द्रमस्तु। इति प्रार्थयेत्। ततः सर्वे सदस्याः संपूर्णमच्छिद्रमस्तु इति वदेयुः। अनंतरं मंत्राशिषो गृहीत्वा सानुनयं विसृज्य ब्राह्म
णान् भोजयित्वा दीनानाथांश्चान्नेन संतोष्य स्वयं सुहृन्मित्रादिप्रीतः सोत्साहः संतुष्टो हविष्यं भुंजीत॥ इत्थं वास्तुशान्तिं विधा
य शुभेऽन्हि सुलग्ने गृहप्रवेशं कुर्यात्॥ स चेत्थम्॥ नवं जलपूर्णं पल्लवोपेतं दूर्वायुतं सुधालिप्तं वस्त्रवेष्टितं संपूर्णपात्रं सफलं क
लशमंजलावादाय शुक्लांबरधरः शुक्लमाल्यभूषितः शुक्लचन्दनतिलकांकितः सपत्नीकः सपुत्रो ब्राह्मणैः सह तूर्यघो
षेण सुमुखश्चेत्यादि श्लोकपाठपूर्वकं गृहं प्रविश्य प्रधानगृहमध्ये धान्योपरि अंजलिस्थं कलशं स्थापयेत्॥ ततो गृहस्थै
र्यथेष्टपुण्याहं वाचयित्वा ब्राह्मणांश्च पूज्य ब्राह्मणान्भोजयित्वा आशिषो गृहीत्वा सुहृद्युतो भुंजीत॥ इति चतुर्थवर्णोपयुक्त